N. A.
Shiva sutra vivarsini
श्री शिवसूत्रविमर्शिनी
Sanskrit
Paper - Handwritten
N. A.
36 Folio
11.5" x 5.8"
Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१०७३६

ಶಿವಸಾಗರ ವಿರಕ್ತಮಠ

शिवसागर विरक्तमठ नं. २५५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰ वि॰ ।।श्रीगुरवे शिवाय नमः।। ॐ रुद्धन्तेत्रजद्वर्गाः समुदयनियतेनोयत्र विश्रान्तिमच्छेद्यं तत्त्वं परस्वविन् / त
१ श्वं स्फुरितमयमयियधनमयं विश्वमेनत् स्वाच्छन्द्यानन्दचन्दोच्छलदमृतमयानुत्तरस्पन्दतत्त्वं।
चैतन्यं शांकरं तज्जयति यदखिलं द्वैतभासाद्वयात्म ।।२।। आसमभ्युदस्यमालोचयरत्तीनामिहनत्व
नः।। शिवसूत्रं व्याकरोमि गुर्वाम्नायविगाननः।।३।। इह कश्चिच्छिवध्यानोन्मिषन्महेश्वरभक्तसनि / कैं
ध कैर / शयामंदनंङ्गीकृतद्वैशानरस्यनागवोध्यादिसिद्धादेशानपिशाचाराधनपरः पारमेश्वरना
नायेगिनीसिद्धसत्तंप्रदायपवित्रितहृदयः। श्रीमहादेवगिरौ महामाहेश्वरः। श्रीमान्व
सुगुप्तनामा गुरुरभवत्।। कदाचिच्छ्रीसोद्धेतदर्शनाधिवासितप्राये जीवलोके रहस्यस
म्प्रदायोमाविच्छेदीत्याशयनोनुजिघृक्षापरेणापरमशिवेन स्वप्नेनुगृह्योन्मिषनप्रतिभः / हो
कृतः यथात्र महीभृति महति शिलातले रहस्यमस्ति।। तदधिगम्याऽनुग्रहयोग्येषु प्रकाश्य
येति।। प्रबुद्धश्चासावन्विष्यंस्तां महतीं शिलां करस्पर्शनमात्रपरिवर्तननतः संवादीकृतस्व १

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग्रं प्रत्यक्षीकृत्य मानि शिवोपनिषत्सङ्ग्रहरूपाणि शिवसूत्राणि तेन समासादः। एतानि
च सम्यगधिगम्य भट्टश्रीकल्लटादिषु सच्छिष्येषु प्रकाशितवान्॥ स्पन्दकारिकाभिश्च सङ्ग्रहो
प्राणि/ तवान्॥ तस्मादस्य शास्त्रे स्पन्दसूत्राण्यस्माभिः स्पन्दनिर्णये सम्यग्निर्णीतानि। शिवसूत्रा
निर्णीयन्ते/ णि तु निर्णीयन्ते॥ तत्र प्रथमं नरेश्वरभेदवादिप्रतिपदो चैतन्यपरमार्थः शिवः स्वविश्व ऐ
स्यात्मेत्यादिशति॥ चैतन्यमात्मा॥१॥ इह चैतितस्य कस्यापि सत्याभावाच्छ्रि निक्रियासर्वसा
मान्यरूपेति॥ चेतयत इति चेतनः सर्वज्ञानक्रियास्वतन्त्रस्तस्य भावश्चैतन्यं सर्वज्ञानक्रिया
सम्बन्धमयं परिपूर्णस्वातन्त्र्यमुच्यते॥ तच्च परमशिवस्यैव भगवतोऽस्य। नाशिवानां
तस्य तस्य च तितत्त्वात्॥ स च यद्यपि नित्यत्वव्यापकत्वामूर्तत्वाद्यनन्तधर्मात्मा॥ तथापि नित्य
त्वादीनाम् अन्यत्रापि सम्भाव्यत्वादन्यासम्भावितः॥ स्वातन्त्र्यस्यैवोद्धतीकारप्रदर्शनमिदमि
त्ययं धर्मोल्लासप्रतिपत्तेपतश्चैतन्यमितिभावप्रत्ययेन दर्शितम्। न देहादात्मा न पुनरन्यः। कोपिभे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्व॰वि॰ दत्वाद्यभ्युपगतो भिन्नाभिन्नस्वभावस्तस्याः चैतन्ये जडत्वमयाऽनात्मत्वाच्चिदात्मत्वे भेदानु
२ पपत्तेश्चिन्तोदेशकालाकारैश्चिद्व्यतिरेकात् स्वचेत्यमानत्वेनात्मसिद्धेश्चैत्यमानत्वेन तु चिदा
त्मभिभेदस्याघातनुमशक्यत्वाच्चिन्मात्रत्वेनात्मनस्तत्स्वभावभेदस्याघटनात् स्वमाता नीत्यः
व्यतिरिक्तमलसम्बन्धयोगेनापि भेदस्यानुपपत्तेः प्राक् मलस्य सत्त्वेऽपि मुक्तिदशायां तद्
प्रशमनात्मवादस्य वक्तुमशक्यत्वान्मलसंस्कारसम्भवेन च ।। नादिशिवात्कथं दृश्य / चि
कर्त्रैवामुक्तशिवाः ।। संसारिणापयस्युरिति पयोक्तं ।। चैतन्यमेकमेवात्मेति नानात्मवादस्या मे
नुपपत्तिः सूचिता ।। अथ चास्माकमिति जिज्ञासन्तु पदेश्यात्मतियोधायितुम् ।। न शरीरप्राण
बुद्धिशून्यानि लौकिकचार्वाकवैदिकयोगाचारमाध्यमिकाभ्युपगतान्यात्मा ।। अपि तु यथो
क्तं चैतन्यमेव ।। तस्यैव शरीरादिकल्पितत्वप्रमातृपदे प्रकल्पिताः ।। इदं विमर्शामयसत्यप्रमातृत्वे
न स्फुरणात् ।। तदुक्तं श्रीमत्स्पन्दकारिके ।। परमात्मस्वरूपं तु सर्वोपाधिविवर्जितम् ।। चैतन्य २

मात्मनो रूपं सर्वशात्प्रभुपद्यते ॥ इति ॥ श्रीविज्ञानभैरवेऽपि ॥ चिद्धर्मा सर्वदेहेषु विशेषो नास्ति कु-
त्रचित् ॥ अतश्च तन्मयं सर्वं भावयन्भवजिज्जन इति । अत एव यत्नः कारणावेशो यमिति कारिकाद्व-
त्य/ येन सङ्क्षेपदेश्यात्प्रत्यभिज्ञानं गुरुणोपादिष्टं श्रीस्पन्दे ॥ किंच यदैतच्चैतन्यमुक्तं तत्पर्यात्मा ए/
स्वभावः ॥ विशेषाचोदनाद्भावाभावरूपस्य विश्वस्य जगतो नश्येत्यमानः कोऽपि कस्यापि कदाचि-
दपि स्वभावो भवति ॥ चेत्यमानस्तु स्वप्रकाशचिदेकीभूतत्वाच्चैतन्यात्मैव ॥ तदुक्तं श्रीमदुच्छुष्म-
भैरवे ॥ यावन्न वेदका एते तावद्वेद्याः कथं प्रिये ॥ वेदकं वेद्यमेकं तु तत्त्वं नास्त्यशुचिस्ततः इति ॥ एत-
देव यस्मात्सर्वमयो जीव ॥ इति कारिकाद्वयेन सङ्गृहीतम् ॥ यतश्चैतन्यं विश्वस्य स्वभावस्तत एव /न्यं
तत्साधनाय प्रमाणादि वै एकमनुपयुक्तम् ॥ तस्यापि स्वप्रकाशचैतन्याधीनासिद्धिकत्वाच्चै-
तन्यस्य च प्रोक्तयुक्त्या केनाप्यावरीतुमशक्यत्वात्सदा प्रकाशमानत्वात् ॥ यदुक्तम् ॥ श्रीत्रिकहृ-
दये ॥ स्वपदा स्वशिरश्छायां यद्वल्लङ्घितुमीहते ॥ पादोद्देशे शिरो न स्यात्तथेयं बैन्दवी कलेति
यो लङ्घितुमीहते तस्य यथा पादोद्देशे शिरो न स्यात्तथेयमित्यत्र सम्बन्धः ॥ अनेनैवाशयेन स्प-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्दे यत्र स्थितमित्याद्युपक्रम्य तदस्ति परमार्थेन इत्यन्तेन महता ग्रन्थेन शङ्करात्मकस्पन्दतत्त्व
रूपं चैतन्यं सर्वदा स्वप्रकाशं परमार्थसदस्तीति प्रमाणीकृतम्॥ यदि तर्हि यत्र ज्ञात्मनो विश्वस्य
परमशिवरूपं चैतन्यमेव स्वभावस्तत्कथमयं बन्ध इत्याशङ्काशान्तये ऽसंहितनया तथा चाकारप्रश्ले
षाऽप्रश्लेषपाठनीतिः सूत्रमाह। ज्ञानबंधः॥ २॥ इहोक्तयुक्त्या चित्प्रकाशाव्यतिरिक्तं न किंचिदुपपद्य
ते इति मलस्यापि काचतादीर्घवालन्निरोधकत्वं स्यादिति भेदवादिनोऽत्र प्रक्रियापरिहारेण मलं/दो
मेऽज्ञानमिच्छन्ति संसाराङ्कुरकारणमिति निश्चज्ञानाद्युच्यते लोकस्ततः स्वाभिध्वंसं घानि शिलि
श्रीमालिनीविजयश्री सर्वाचारोक्तस्थित्या यः परमेश्वरस्य स्वातन्त्र्यशक्त्याभासितस्वरूपगोपना
रूपया॥ महामायाशक्त्या स्वात्मन्याकाशकल्पेऽनाश्रितात्मभूतिमायाप्रमातृत्वे संकोचावभा
सितः॥ स एव शिवाभेदाऽख्यात्यात्मकाज्ञानस्वभावोऽपूर्णम्मन्यतात्मकाणवमलसतत्त्वसङ्कु
चितज्ञानात्मा बन्धः॥ यथा च व्यतिरिक्तस्य मलस्यानुपपन्नत्वं॥ तथास्माभिः श्रीस्वच्छन्दोद्यो
ते पञ्चमपटलान्ते दीक्षाविचारे विततम्प्रदर्शितम्॥ एषच स्वज्ञार्थो निजाशुद्ध्यासमर्थस्येति का २

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रिकाभागेनसङ्गृहीतः॥ एवमात्मन्यनात्मनाभिमानरूपाख्यातिलक्षणाज्ञानात्मकंज्ञानंन

नि/ केवलंबन्धोयावदनात्मभिशरीरादावात्मताभिमानात्मकमज्ञानमूलंज्ञानमपिबन्धएव॥ए

नश्चपरामनरसायाम्प्रशिनि कारिकां[या]सङ्गृहीतम्॥ एवंचैतन्यशब्देनोक्तंयत्किञ्चित्स्वातन्त्र्यात्म

कंरूपंतत्र्यपिदात्मन्यपिस्वातन्त्र्या ग्रथात्माविज्ञानाकलवदपूर्णमन्यतामात्रात्मनारूपेणाख्या

तन्त्र्यपिदेहादावबोधरूपेणानात्मन्यात्मत्वाभिमानात्मनारूपेणाद्विप्रकारमाणवंमलम

नै/ नैनसूत्रेणाभिहितम्॥ तदुक्तंश्रीप्रत्यभिज्ञायाम्॥ स्वातन्त्र्यहानिर्बोधस्यस्वातन्त्र्यस्याप्यबोध

ता॥ द्विधाणवंमलमिदंस्वस्वरूपापहानितइति॥ कीमीयगाणावमलन्नैवबन्धोनेत्याह॥ यो

निवर्गःकलाशरीरम्॥ बन्धइत्यनुवर्तते॥ योर्नयोनैर्भिद्यकारणस्यमायायाः॥ सम्बन्धीवर्गः

तादात्म्यारम्भ्यर्येणवङ्कतुकोदेहभुवनाद्यारम्भीकिञ्चित्कर्तृत्वाद्यात्मककलादिक्षित्यन्तस्त

त्वसमूहस्तद्रूपंमायीयं॥ तथाकलयति॥ स्वरूपावेशेनतत्तद्वस्तुपरिच्छिन्नत्तीतिकलाव्यापारः

शरीरंस्वरूपंयस्यतत्कलाशरीरंकार्ममलमपिबन्धइत्यर्थः॥ एतदपिनिजाशुद्धासमर्थस्यकर्तृ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰ वि॰ व्येष्वभिलाँषिणा इत्यनेनैव सङ्गृहीतम्॥यथाचैतत्तथास्मदीयात्॥स्वच्छन्दनिर्णयाद्बोद्धव्यम्
८ ॥एषां च कलादीनां किञ्चित्कर्तृत्वादिलक्षणां स्वरूपमाणवमलमिश्रितत्वं पुंसामावरक
त्वमामलत्वेनास्तित्वमेव॥ यदुक्तं श्रीस्वच्छन्दे॥ मलप्रध्वस्तचैतन्यं कलाविद्यासमाश्रितम्
रागेण रञ्जितात्मानं कालेन कलितं तथा॥नियत्या यमितं भूयः पुंभावेनोपबृंहितम्॥प्रधा
नाशयसम्पन्नं गुणत्रयसमन्वितम्॥बुद्धितत्त्वसमासीनमहङ्कारसमावृतम्॥मनसा बु
द्धिकर्मीक्षैस्तन्मात्रैः स्थूलभूतकैरिति॥कार्ममलस्याप्यावरकत्वं श्रीमालिनीविज
ये प्रदर्शितम्॥धर्माधर्मात्मकं कर्म सुखदुःखादिलक्षणमिति॥तदेतन्मायीयं च कार्मं च
मलम्॥भिन्नवेद्यप्रथात्रेयमायाख्यं जन्मभोगदम्॥कर्तर्यबोधे कार्मं चेति श्रीप्रत्यभिज्ञा
याम्॥ आणवाभिन्नेकं सङ्कुचितविशिष्टज्ञानत्वेनोक्तम्॥अथ कथमस्याज्ञानात्मक
ज्ञानत्वेन निवर्तकत्वाच्छारीरस्वरूपस्य त्रिविधस्य मलस्य बन्धकत्वमित्याह॥ ज्ञानाधिष्ठा
नं मातृका॥ पदेन त्रिविधमलस्वरूपमपूर्णम्मन्यताभिन्नवेद्यप्रथाशुभाशुभवासना ८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्मकविपिंडत्वाथनमुत्तमम्॥ नत्यादिक्षान्तरूपा ज्ञानामाता मातृका विश्वजननी॥ ततनत्तद्रू
चितयेथाभासात्मनो ज्ञानस्यापूर्णोस्मि कृशः स्थूलोवास्मि प्रातिष्ठोमयाज्यस्मि इत्यादि
ततद्दिविकल्पकसविकल्पकाः॥ वभासपरामर्शमयस्य तत्तद्वाचकशब्दानुवेधद्वारेण शोक
स्मयहर्षरागादिरूपतामादधाना॥ करन्धचितिमध्यस्था ब्रह्मरन्ध्रावलम्बिका। पीठेश्वर्यो
महाघोरामोहयन्तिमुहुर्मुहुरिति॥ श्रीत्रिशिरोमहाभट्टारकोक्तनीत्यावर्गकलाधिष्ठातृब्राह्म्या
दिशक्तिश्रेणीशोभिनी श्रीसर्ववीराद्यागमप्रसिद्धलिपिक्रमसन्निवेशोत्थापिकाम्बाज्ये
ष्ठारौद्रीवामाख्यशक्तिचक्रचुम्बिनाथशक्तिरधिष्ठानाद्यन्तरभेदानुसन्धिवन्ध्य त्री
त्वात्स्वरागमप्यलब्ध्वविश्रान्ती निर्वाहिमुखान्यवज्ञानानीतिमुक्तेर्वेषांवन्धकत्वोक्तिः॥ एतस्य
शब्दराशिसमुत्थस्येतिकारिकायासङ्ग्रहोनम्॥ स्वरूपावरणेचास्यशक्तयः॥ सततोस्थिता इ
तिच कारिकायासङ्ग्रहो नम्॥ अथैतदन्धप्रशमोपायमुपेयविश्रान्तिसतत्वमादिशति॥
५॥ ऊर्ध्वमोभैरवः॥ योयंप्रसररूपाया विमर्शमय्याः संविदोकारान्त्युच्छूनात्मकपरप्रतिभात्म
लं।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्ञानरूप॥ उद्यमः सएव सर्वशक्तिसामरस्येनाशेषविश्वभरितत्वात्सकलकल्पनाकुलाल
ङ्कवलनमयत्वात्प्रभैरवोभैरवात्मकस्वस्वरूपाभिव्यक्तिहेतुत्वाद्युक्तिभाजामंतर्मुखैवततत्वा
वधानधनानांजायतइत्युपादिष्टंभवति। तदुक्तंमालिनीविजये॥ अकिञ्चिच्चिन्तकस्यै
वगुरुणाप्रतिबोधतः॥ जायतेयः समावेशः शांभवोसावुदीरितः इति अत्रहिगुरुणाप्र
तिबोधनइत्यत्रगुरुतः स्वस्मात्प्रतिबोधनइत्यप्यर्थोगुरुभिरादिष्टः॥ श्रीस्वच्छन्देप्यु
क्तम्॥ आत्मनोभैरवंरूपंभावयेद्यस्तुपूरुषः॥ तस्यमन्त्राः प्रसिध्यन्तिनित्ययुक्तस्यसुन्द
रीति॥ भावनंह्यन्तर्मुखोद्यन्तनापदविमर्शनमेव॥ एतच्च॥ एकचिन्ताप्रसक्तस्ययतः
स्यादपरोदयः॥ उन्मेषः सतुविज्ञेयः स्वयंतमुपलक्षयेदित्यनेनसंगृहीतम्॥ एवं
व्युत्थानेपिपरप्रतिभोन्मेषावष्टम्भोपायिकानांभैरवसमापत्तिप्रज्ञानयत्नप्रशामैकहेतुंप्र
दर्श्यैनमेवतामप्रकर्षं व्युत्थानमपिप्रशान्तभेदावभासंभवतीत्याह शक्तिसन्धानेविश्व/ चक्र
८॥ संहारः॥ योयंपरप्रतिभोन्मज्जनान्मोद्यन्तनास्वभावोभैरवतुकोस्यैवान्तर्लक्ष्यबहिर्दृष्टा/ उ



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्रमा

त्मयान्निःशेषशक्तिचक्रक्रमाक्रमिरायनिक्रान्तक्रमाक्रमातिरिक्तं तदुभयात्मतयाप्य

भिधीयमानाः पर्यन्तद्रूपानुत्तरापरास्थानस्थशक्तिः काप्यस्ति ॥ यया स्वरूभिन्नो बाह्योल्लासात्प्रभृ

ति परप्रमातृविश्रान्त्यन्तं ॥ श्रीमत्सृष्ट्यादिशक्तिचक्रस्फुरत्तामाक्रीडेयमादर्शिता ॥ त

चक्र/ स्यैतदाभासितस्य शक्तिस्य रहस्याम्नायाम्नातनीत्यायत्तस्थानं यथोचितं क्रमविमर्शनं ॥

तस्मिंस्तस्मिन्कालाग्न्यादेश्चरमकलान्तस्य विश्वसंहारो देहात्मतयावाप्तघनतया चावस्थितस्यापि सतः

परसंविदग्निसाद्भावो भवतीत्यर्थः ॥ उक्तं च श्रीभर्गशिखायाम् ॥ मृत्युं च कालं च कलाकला

पं विकारजालं प्रतिपत्तिसाम्यम् ऐकात्म्यनानात्मविकल्पजालं तदास सर्वं कवलीकरोती

ति ॥ श्रीमद्वीरावलावपि यत्र सर्वे लयं यान्ति दह्यन्ते तत्त्वसञ्चयाः ॥ तां चितिं पश्य कायस्थां का

लानलसमत्विषमिति ॥ श्रीमालिनीविजयेऽपि ॥ उच्चाररहितं वस्तु चेतसैव विचिन्तयन् ॥ यं

समावेशमाप्नोति शाम्भवः सोऽभिधीयत इत्युक्तेन ढंग्या निरूपितम् ॥ एतच्च सद्गुरुचरणोपा

सनयाभिव्यक्तिमायातीति नातिधिकमुन्मीलितम् ॥ एतदेव यस्योन्मेषनिमेषाभ्यामिति पदाले

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कृत्वा संकृट इति च प्रथमचरमश्लोकाभ्यां सङ्गृहीतम् ॥ एवमुपपन्ने सति विश्वस्य तत्समा-
धिव्युत्थानभेदः कोऽपीत्याह ॥ जाग्रत्स्वप्नसुषुप्तभेदे तुर्याभोगसम्भवः ॥ जाग्रदादीनि ॥७॥
रूपाणि व्यमाणानां जाग्रत्स्वप्नसुषुप्तानां भेदे नानात्वे पृथक्त्वावभासे । उद्यमो भैर-
व इति लक्षितस्य स्फुरत्तात्मनः सर्वदशानुस्यूतस्य तुर्यस्याभोगश्चमत्कारस्तस्य सम्भ- र्या
वो नित्यमेव तुर्यचमत्कारमयत्वं प्राक्तमहायोगयुक्तस्य भवतीत्यर्थः । कथितस्य भव
इति संविदि तिस्रः सार्धपदं निरुक्तं बन्धयेन्दुः पुष्पसङ्काशाः समन्तादवभासने आह्ला-
दनसमूहेन जगदाह्लादयेत्क्षणात् ॥ नृतद्वेदविमहायोगी यदा पर्यटते महीम् ॥ ज्ञा-
नेन्दुकिरणौस्समैर्जगद्विश्वं समस्तकम् ॥ आह्लादयेत्समन्तान्नंदीर्यादिशिवात्मक-
मिति श्रीचन्द्रज्ञाने जागरादौ तुर्याभोगमयत्वं महायोगिनो दर्शितम् ॥ स्पन्देऽपि जागरादि
विभेदेऽपीति कारिकया सङ्गृहीतम् ॥ एतज्जाग्रदादित्रयं सूत्रत्रयेण लक्षयति ॥ ज्ञानं
जाग्रत् ॥ स्वप्नो विकल्पाः ॥ अविवेको मायासौषुप्तम् ॥ सर्वमाधारतत्त्वार्थविषयं वाह्य ६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्द्रियजं ज्ञानं लोकस्य जाग्रत्‌ जाग्रदवस्था ॥ यत्तु मनोमात्रजन्या असाधारणार्थविषया
विकल्पाः स एवास्य प्रसुप्तावस्था ॥ तस्यैवंविधविकल्पप्रधानत्वात्‌ ॥ यस्त्वविवेको वि
वेचनाभावः ख्यातिरेव देवमायारूपं मोहमयं सौषुप्तम् ॥ सौषुप्ते लक्षणतापसङ्गा
दुरुच्छेद्या या मायापाया अपि स्वरूपमुक्तम् ॥ इत्थं चेदृशेनाप्यनेन लक्षणलिस्त्वपि
जाग्रदादिदशासु त्रैरूप्यमस्तीति दर्शितम् ॥ तथा चात्र ॥ यद्वस्त्वमदशोचितं तं प्रथ प्र
मम् अविकल्पकं ज्ञानं सा जाग्रता ॥ यत्तु तत्र विकल्पाः स स्वप्नः ॥ तत्त्वाविवेचनं सौषुप्त
म् ॥ सौषुप्तेऽपि यथा विकल्पानां संबंधेत्यन्ते ॥ तथापि तत्त्वाविविश्चार्थानां योऽचितं जाग्रज्ज्ञा
नमिव तदनन्तरं संस्कारकल्पविकल्परूपं तदुचितः स्वप्नोऽप्यस्यैव ॥ किं च योऽप्यभि
ये/ प्रायेण प्रथमं तन्तुद्वारेणात्स्वपं ज्ञानं जाग्रत्‌ ॥ ततस्तत्प्रत्ययप्रवाहरूपा विकल्पाः
प्र/ स्वप्नः ॥ ग्राह्यग्राहकभेदासंचेतनरूपश्च समाधिः सौषुप्तमित्यनया वाचोयुक्त्या द
र्शितम् ॥ अत एवाभीपूर्वदशासु जाग्रदादीनां परस्परानुवेधरूपतायोऽप्यभिप्रायेणापि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू.वि. अबुद्धबुद्धमेवं च प्रबुद्धं सुप्रबुद्धं चेत्यादिना भेदो निरूपितः ॥ एवं लोकयोग्यनु
७ सारेण व्याख्याने जाग्रदादित्रये शक्तिचक्रसन्धानाद्विश्वसंहारेण यस्य तुर्याभोगम
ष्या / यत्वमभेदव्याख्यात्मकं स्फुरति ॥ एतद्द्वाराधिरोहेण तुर्यातीतं पूर्वोक्तं चैतन्यमावि । न्य
र्भवत् । त्रिषु भोक्ता वीरेशः ॥ एवं जागरादित्रये शक्तिचक्रानुसन्धानयुक्तानु
ये आनन्दाच्छुरितं यत्तत्परामर्शानुप्रवेशप्रकर्षादिगलितभेदतत्स्फारमानन्दरस
प्रवाहमयमेव पश्यति ॥ तत्रितयस्यास्य भोक्ता चमत्कर्ता तत्रैव त्रिषु धामसु यद्भोग्यं
भोक्ता यश्च प्रकीर्तितः ॥ वेदैतदुभयं यस्तु भुञ्जानोऽपि न लिप्यते इति नीत्या नि
त्यापत्त्यात्मसामान्याख्योऽयं परमानन्दपरिपूर्णोऽभेदशून्यः सन् प्रमाणानां भीषणानामिन्द्रि गा
णा / याणामीश्वरः स्वामी श्रीमन्थानभैरवमन्त्रानुप्रविष्टो महासाधक उच्यते ॥ यस्त्वेवंविधो
न / न भवति स जागराद्यवस्थाभिर्भुज्यमानो लोकपशुरेव ॥ योगपदवीमधिरोहमनारूढो
ढ नवीरेश्वरोऽपि तु मूढ एवेत्युक्तं भवति ॥ एतच्च योगी स्वच्छन्दयोगेन स्वच्छन्दगतिश्चा
७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रिणां ॥ तस्य स्वच्छन्दपदे युक्तः स्वच्छन्दसमतां व्रजेदित्यादित्यादिना श्रीस्वच्छ
न्दादिशास्त्रेषु वितत्य दर्शितम् ॥ स्पन्देपि ॥ तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी
त्यादिकारिकया तत्संगृहीतम् ॥ किमस्य महायोगिनः काश्चित्तत्वारोहप्रत्या
सन्नाभूमिकाः सन्ति याभिस्तत्वोर्ध्ववर्तिनी भूमिर्लक्ष्यते ॥ सन्तीत्याह ॥ विस्मयो यो
गभूमिकाः ॥ २९ ॥ यथातिशयवस्तुदर्शने कस्यचिद्विस्मयो भवति ॥ तथास्य महा चि.
योगिनो नित्यं तत्तद्वेद्यावभासपरामर्शभोगेषु निस्सामान्यातिशयनवनवचमत्कार
चिद्घनस्वात्मावेशवशात् स्मेरस्मेरस्फितविकसितसमस्तकरणचक्रस्य यो
विस्मयोऽनवच्छिन्नानन्दस्वात्मपरितृप्तत्वेन मुहुर्मुहुराश्चर्यमाणतात एव योग
स्य परतत्वैक्यस्य सम्बन्धिन्यो भूमिकास्तदध्यारोहविश्रान्तिसूचिकाः परिमिता भू
मयो न तु कन्दबिन्द्वाद्यनुभवरूपाः ॥ तदुक्तं श्रीकुलयुक्तौ ॥ आत्मा चैवात्मना ज्ञातो
यदा भवति साधके ॥ तदा विस्मयमात्मा वै आत्मन्येव प्रपश्यतीति ॥ एतच्च नम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰वि॰ धिष्ठानभावेन स्वभावमवलोकयन्॥ अथ यमाम इत्यादि यस्यामस्येयं कुलशक्तिः कुलशक्तिका
८ रिकया सङ्गृहीतम्॥ ईदृग्योगभूमिका समापन्नस्यास्य॥ इच्छाशक्तिरुमा कुमारी ॥११॥
योगिनः परमैश्वर्यं तां समापन्नस्येच्छाशक्तिरुमा परैव पारमेश्वरी स्वातन्त्र्यरूपा
मा कुमारी विश्वसर्गसंहारक्रीडापरकुमारीक्रीडायामित्यादिपाठात्॥ अथ च कुंभे
दैत्याधिकां मायाभूमिकां मारयति अनुद्भिन्नप्रसरां करोतीति नश्लीला कुमारी। कु
मारीव परानुभोग्याभोक्त्रैकात्म्येन स्फुरन्ती अथ वा च यथोमा कुमारी परिहातसर्व
सङ्गा महेश्वरैकात्म्यसाधना राधनायति त्योमा सुरूपा॥ तथोमास्येच्छा॥ इत्यस्मद्गुरु
भिरित्थमेव पाठो दृष्टो व्याख्यातश्च॥ अन्ये तु शक्तिर्नमीति पठित्वा ज्ञानक्रियोप
योस्याः प्रकर्षो व्याकृतः॥ एवं न लौकिकवदस्य योगिनः स्थूलेच्छापितु पराश
क्तिः रूपैव सर्वत्राप्रतिहता॥ तदुक्तं श्रीमत्स्वच्छन्दे॥ सा देवी सर्वदेवीनां नामरूपे
ष्ववतिष्ठति॥ योगमायाप्रतिच्छन्ना कुमारी लोकभाविनी॥ श्रीमन्मृत्युञ्जयभ



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ट्टारकेऽपि ॥ सामर्थ्यमिच्छापरा शक्तिः । शक्तियुक्तः स्वभावज्ञो वन्हेरूष्मेव विज्ञेया रश्मिरूपा
रवेरिव ॥ सर्वस्य जगतो वापि सा शक्तिः कारणात्मिकेति ॥ तदेतत् ॥ न हीच्छानोद
नस्यायं प्रेरकत्वेन वर्त्तते ॥ अपि त्वात्मबलस्पर्शात्पुरुषस्तत्समो भवेदिति कारि
कयाभंग्या प्रतिपादितम् ॥ ईदृशमस्य महेश्वरस्य ॥ दृश्यं शरीरम् ॥ यद्य दृश्यं वा ह्यभ्य
न्तरं वा तत्सर्वमहमिदमिति सदाशिववन्महासमापत्या स्वाङ्गकल्पमस्य स्फुरतीति
उ/ भेदेन ॥ शरीरं च देहधीप्राणात्मशून्यस्वरूपं नीलादिवद्दृश्यं ॥ ननु पशुवद्दृष्टतया भा
ति ॥ एवं देहे वा ह्यं च सर्वत्रास्य मयूराण्डरसवदविभक्तेव प्रतिर्भचति ॥ यथोक्तं वि
ज्ञानभैरवे ॥ जलस्येवोर्मयो वह्नेर्ज्वालाभङ्ग्यः प्रभा रवेः ॥ ममैव भैरवस्यैता विश्वभं
ग्यो विनिर्गताः इति ॥ एतेन भोक्तेव भोग्यभावेन सदा सर्वत्र संस्थित इत्यनेन सङ्ग
हीतम् ॥ यश्चेदं सर्वस्य दृश्यस्य शरीरतया स्फुरत्यान्तस्य शरीरस्य दृश्यतनैयेकरूपं
प्रकाशनमुक्तं तेनेदं घटमपि तु ॥ ह्य देयं चित्तमङ्ग्ह्य दृश्यत्वापदर्पणं बिम्बप्रतिष्ठा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शि॰ वि॰ स्यानन्दाच्चित्प्रकाशो ह्यस्य दृश्यम् ॥ तत्रचित्तसङ्घ॰ ट्टाच्चित्तस्य अन्तस्तदेकाग्रभावनाद्दृ
१९ श्यस्य नीलदेहप्राणाद्यात्मनः स्वापस्य चैतन्याभावरूपस्य शून्यस्य दर्शनं स्वग्रा
ह्यग्राहकविभेदेन यथावस्तु स्वाङ्गकल्पतया प्रकाशनं भवति ॥ चित्प्रकाशनाममभि
निविश्यमानं हि चित्तं तदाभ्युदितमेव विश्वं पश्यति ॥ तदुक्तं श्रीविज्ञानभैरवे ह्य
द्याकाशे निलीनाक्षः पद्मसंपुटमध्यगाः ॥ अनन्यचेताः सुभगे परं सौभाग्यमाप्नु
यादिति ॥ परं ह्यत्र सौभाग्यं विश्वेश्वरतापत्तिः ॥ तत्त्वरत्निसमापन्नं योगिनमुद्दिश्य
श्रीस्वच्छन्देऽपि सचसर्वेषु भूतेषु भावयंस्त्र्येन्द्रियेषु च ॥ व्यापकं जङ्गमं चैव चेतन
नाचेतनं स्थितम् ॥ अध्यानं व्याप्य सर्वेषु सापाश्रयेन तंस्थितं इति स्पन्दे तु ॥ तथा
स्यात्मन्यधिष्ठानात्सर्वत्रैवं भविष्यतीत्यनेनेन तत्सङ्गृहीतम् ॥ अत्रैवोपायान्तर /त्य
माह ॥ शुद्धतत्त्वसन्धानाद्वापशुशक्तिः ॥१२॥ शुद्धतत्त्वं परमशिवाख्यं तत्रधर्यदाविश्वम /य
नुसन्धत्ते तत्स्यपमेयेनादिति ॥ तदानिघुमानापश्चात्यापातान्तिर्यस्यनाद्दृगपेसदा १९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ने। / शिवैवंभ्यस्यजाग्रतः पतिर्भवति ॥ तदुक्तं श्रीकौलार्णवे दीक्षासिद्धौ तु ये प्रोक्ताः प्रत्ययाः
स्तोभपूर्वकाः सन्धानस्यैव ते देवि कलां नार्हन्ति षोडशीम् ॥ श्रीविज्ञानभैरवे तु ॥ सर्वं दे
हं चिन्मयं हि जगद्वा परिभावयेत् ॥ युगपन्निर्विकल्पेन मनसा परमोदय इति तदेत
द्विवितायस्य संवित्तिः क्रीडात्वेनाखिलं जगत् ॥ स पश्यन् सततं युक्तो जीवन्मुक्तो
या/ न संशय इति कारिकें सङ्गृहीतवान् ईदृग्ज्ञानरूपस्याऽस्य ॥ वितर्क आत्मज्ञान
म् ॥ विश्वात्मा शिवरूपो ऽस्मीति यो वितर्को विचाररूपस्तदेवास्यात्मज्ञानम् ॥ तदुक्तं
श्रीविज्ञानभैरवे ॥ सर्वज्ञः सर्वकर्ता च व्यापकः परमेश्वरः ॥ स एवाहं शैवधर्मा इति
दार्ढ्याच्छिवो भवेदिति ॥ स्पन्देप्य ॥ यथेवात्मनो ग्रहः इत्यनेनैतदुक्तम् ॥ तत्र ह्या
त्मनो ग्रहणं ग्रहो ज्ञानमेतदेव पट्टिश्वात्मकशिवाभिन्नत्वमेषोऽप्यर्थो विवक्षि
तः ॥ किंचास्य लोकानन्दः समाधिसुखम् ॥ १२ ॥ लोक्यत इति लोको वस्तुग्रामः ॥ लोक
यतीति च लोको ग्राहकवर्गस्तस्मिन्स्फुरति सति ग्राह्यग्राहकसंवित्तिः सामान्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू० वि० सर्वदेहिनाम्॥ योगिनां तु विशेषोऽयं सम्बन्धे सावधानतेति श्रीविज्ञानभट्टारकनि
१० रूपितनीत्या प्रमातृपदविश्रान्त्यवधानात् चमत्कारमयो य आनन्दघनदेवा
त्मसमाधिसुखम्॥ तदुक्तं तत्रैव॥ सर्वं जगत्स्वदेहं वा स्वानन्दभरितं स्मरेत्॥ युगप
त्स्वामृतेनैव परानन्दमयो भवेदिति॥ एतच्च यथैवामृतप्राप्तिरित्यनेन सङ्गृही
तवान्॥ अथ च यदस्य स्वात्मारामस्य समाधिसुखं तदेव तत्ताद्दृश्यमवलोक
यतां लोकानामानन्दसङ्क्रमणात् सुतरां स्वानन्दाभिव्यक्तिपर्यवसायि भवतीति॥
एतदपि श्रीचन्द्रज्ञानग्रन्थेन प्रागुक्तेन सुसंवादम्॥ अथैतद्दशास्यास्य योगिनो वि
भूतियोगं दर्शयति॥ शक्तिसन्धाने शरीरोत्पत्तिः॥ १९॥ इच्छाशक्तिरुमा कुमारीति
सूत्रे गाया अस्य शक्तिरुक्ता॥ तामेव यदानुसन्धत्ते तदा तन्मयीभवति॥ तदा तद्व
शेनास्य यथाभिमतं शरीरमुत्पद्यते॥ तदुक्तं श्रीमृत्युञ्जयभट्टारके॥ ततः प्रवर्त
ते शक्तिर्लक्ष्यहीना निरामया॥ इच्छा सा तु विनिर्दिष्टा ज्ञानरूपा क्रियात्मिका तु १०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पञ्चम्यां तामेवोनिः सर्वदेवानां शक्तीनां चाप्यनेकधा । अग्नित्वेमाग्निके योनिस्तस्यां स
र्वप्रवर्तनं इति ॥ शक्तिसन्धानमाहात्म्यं श्रीलक्ष्मीकौलार्णवे ॥ नसन्धानेन विना दीक्षा
न सिद्धीनां च साधनम् ॥ न मन्त्रं मन्त्रशक्तिश्च न योगाकर्षणं तथेत्यादिना प्रतिपादि
तम् ॥ एतद्ध्येयस्वाभ्यासिनो धाताज्ञागतनोर्थं हृदि स्थितानां ॥ सोमसूर्यौ दर्पं कृत्वा
सम्पादयति देहिन इत्यनेन सङ्कुहीनम् ॥ देहिनो त्यक्तदेहया मनस्य योगिनो हृदि
स्थितानां नर्थो स्तनदपूर्वं निर्माणादिरूपान्धातां महेश्वरं आकाशानन्दात्मनया सो
मसूर्यरूपया हान्मीलनेन च सोमसूर्यसामरस्यात्मनः शक्तेहृदयं कृत्वा बहिर्मुख
त्वेन नामासाधसंपादयतीति ह्यस्यार्थस्तथा च भैरव्युभोद्वार्यानित्येतच्छ्लोक
प्रतिपादितस्य समस्यानन्त्यं प्रति दृष्टान्ते योजित इति स्पन्द‸र्णये मयेव दर्शितम् ॥ [नि
अन्याश्रय्य स्वयमेवाभिलक्षिता । स्मियपतन्माहात्म्ये नैवटलं इत्याह ॥ भूतसन्धा
नं भूतपथवृक्तविश्वसङ्घट्ट ॥ १५ ॥ भूतानि शरीरप्राणाभावाद्यात्मकानि तेषां कचिदाप्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यत्नादौ सन्धानं वा पोषणं॥ व्याध्याद्युपशमादौ पथ्यक्रमशरीरादेर्विश्लेषणादेशा
कालादिविप्रकृष्टस्य चिरप्रयत्नस्य सङ्घट्टो ज्ञानविषयीकार्यत्वादिकोऽस्य पूर्वोक्तशक्ति
सन्धाने सति जायते॥ एतच्च सर्वागमेषु साधनाधिकारे व्याख्याति॥ तदेव स्पन्दे॥ दु
र्बलोऽपि तदाक्रम्य यतः कार्ये प्रवर्तते॥ आच्छादयेद्बुभुक्षां च तथा योऽतिबुभुक्षित
इति॥ ग्लानिर्विलुण्ठिका देहे तस्याश्चाज्ञानतः सृतिः॥ तदुन्मेषविलुप्तं चेत्कु
तः सा स्यादहेतुका॥ यथा ह्यर्थोऽस्फुटो दृष्टः सावधानेऽपि चेतसि॥ भूयः स्फुटतरो
भाति स्वबलोद्योगभावितः॥ तथा यत्परमार्थेन येन यत्र यथा स्थितम्॥ तत्तथा बल
माक्रम्य न चिरात्संप्रवर्तत इति॥ आदिना विभूतिस्पन्दे सोपपत्तिकं दर्शितम्॥ यदा
तु भिन्नशक्तीरनभिलक्ष्य विश्वात्मप्रथाभिषिक्तमिति तदास्य॥ शुद्धविद्योदयाच्चक्रे
शत्वसिद्धिः॥ येऽस्यात्म्यप्रथायामिच्छया यया शक्तिं सन्धत्ते॥ तदाहमेव सर्वमिति
शुद्धविद्याया उदयाद्विश्वात्मकस्य शक्तिचक्रेशत्वस्वरूपं माहेश्वर्यमस्याभिव्यनक्ति॥ 

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदुक्तंश्रीस्वच्छन्देतस्मात्साहिपराविद्यायस्यादन्यानविद्यते॥विन्दतेह्यत्रसुग
पत्सर्वज्ञादिगुणान्परान्॥वेदनानादिधर्मस्यपरमात्मत्वबोधना॥वर्जनापरमा
त्मत्वेतस्माद्विद्येतिसोच्यते॥तत्रस्थोव्यज्ञयेनेजः परंपरमकारणम्॥परास्मिंस्ते
ज्ञसिव्यक्तेतत्रस्थःशिवतांव्रजेदिति॥तदेतदिदन्तयेयसर्वार्थान्यःदाव्याप्यावति
ष्ठते॥तदाऽऽकिंबहुनोक्तेनस्वयमेवावभोत्स्यतइत्यनेनैवसङ्गृहीतम्॥यदानुस्वा १८
त्मारामतामेवेच्छतितदास्य॥महाहृदानुसन्धानान्मन्त्रवीर्यानुभवः॥पराभट्टा
रिकारूपासंविदिच्छाशक्तिप्रमुखंस्थूलमेयपर्यन्तंविश्वंवमन्तीखेचरीचक्राद्य
शेषवाहप्रवर्त्तकत्वस्वच्छत्वानावृतत्वगम्भीरत्वादिधर्मयोगान्महाहृदस्तस्यानु
सन्धानादन्तर्मुखतयानारतंतत्तादात्म्यविमर्शनोद्भूयमाणस्यशब्दराशिस्फा
रात्मकपराहन्ताविमर्शीयस्यमन्त्रवीर्यस्यानुभवःस्वात्मरूपतयास्फुरणंभवति॥
अतएवश्रीमालिनीविजयेयासाशक्तिर्जगद्धातुरित्युपक्रम्येच्छादिप्रमुखपञ्चा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰वि॰ शाद्वेदरूपतया मातृकामालिनीरूपतामशेषविश्वमयीं शाक्तैः प्रदर्श्य तेनतपव
१२ मन्त्रद्वारोदर्शित इति परैव शक्तिर्महाहृदत्वेन तदनुसन्धानान्मातृकामालिनी
तत्वमन्त्रवीर्यानुभव इति पर्यन्तमुक्तम्॥ एतदेव तदाक्रम्य बलं मन्त्रा इत्याद्युक्त्या
भङ्ग्या प्रतिपादितम्॥ तदेवं चैतन्यमात्मेत्युपक्रम्य ननसचानत्र्यावभासितनद
र्व्याप्तिमयं सर्वमेवं बन्धं यथोक्तौघमात्मकभैरवसमापत्तिः॥ यथा मयन्तीविश्वं
स्वानन्दामृतमयं करोति॥ सर्वाङ्गसिद्धिर्मन्त्रवीर्यानुभवेशान्ताः इदानीमिति शा
दृष्टा/ म्भवोपायप्राधान्येनायं प्रथम॥ उन्मेषखण्डः॥ अत्र तु मध्ये शक्तिस्वरूपमुक्तं तच्छा
म्भवरूपस्य शक्तिमतः प्रदर्शनाभिप्रायेणेति शिवम्॥ इति शिवसूत्रवार्त्तिके शाम्भ
वोपायप्रकाशनं प्रथम उन्मेषः॥ इदानीं शाक्तोपायः॥ प्रकाश्यतेनन्त्र शक्तिर्मन्त्रवीर्य
स्फाररूपेति प्रथमोन्मेषान्तसूत्रनिर्दिष्टं तत्स्वरूपविवेचनपुरःसरमुन्मेषान्तरमारभ
चि/ माणो मन्त्रस्वरूपं तावन्निरूपयति॥ चित्तं मन्त्रः॥१॥ चेत्यतेनेन विमृश्यतेनेन परं तत्त्वमिति १२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चित्तंपूर्णस्फुरत्तासत्तत्वप्रसादप्रगुणावादिविमर्शात्मरूपंसंवेदनम्॥तदेवमन्त्र
तेगुप्तभयित्वेन विश्वमयत्वेनतेनपरंतत्वमिति चित्तं पूर्णस्फुरत्तासत्तत्वप्रसादप्रगुणावा
दिविमर्शात्मरूपंसंवे त्तरभेदेनाविश्यते परमेश्वररूपमनेनेतिरुत्वा मन्त्रः॥ अन्त
रवच परस्फुरत्तात्मकमननधर्मनाभेदमयसंसारप्रशमनात्मकत्राणधर्मेणाचा
स्यनिरूते अथच मन्त्रदेवताविमर्शपरत्वेन प्राप्ततत्सामरस्यमाराधकचित्तमेव
मन्त्रः॥ ननु विचित्रवर्णसङ्घट्टनामात्रम्॥ तदुक्तं श्रीसर्वज्ञानोत्तरे॥ उच्चार्यमा
णा ये मन्त्रा न मन्त्रांश्चापि तान्विदुः॥ मोहिता देवगन्धर्वा मिथ्याज्ञानेन गर्विता
इति॥ श्रीतन्त्रसद्भावेऽपि॥ मन्त्राणां जीवभूता तु या स्मृता शक्तिरव्यया॥ तया
हीना वरारोहे निष्फलाः शरदभ्रवत्॥ श्रीश्रीकण्ठीयसंहितायां तु॥ पृथङ्म
न्त्राः पृथङ्मन्त्री नासिद्ध्यति कदाचन॥ ज्ञानमूलमिदं सर्वमन्यथा नैवर्द्धं नीति॥ ( सिध्य
उक्तमेतच्च स्पन्दे॥ तदाराधकचित्तेन ननेनैते शिवधर्मिणः॥ इति भङ्ग्या प्रतिपादितम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अस्य च ॥ प्रयत्नः साधकः ॥ यथोक्तरूपस्य मन्त्रस्यानुसन्धित्सात्मा प्रथमोन्मेषावष्टम्भप्रयतना
 त्मकृतको यः प्रयत्नः ॥ स एव साधको मन्त्रयितुर्मन्त्रदेवतातादात्म्यप्रदः । उक्तं श्रीनेत्रसद्भावे
आभिमुख्यं तु यथा खस्थः सम्पश्यन् शाकुनिः प्रिये । क्षिप्रमाकर्षयेद्यद्वद्दृष्टेन सहजेन तु त
द्वदेव हि योगीन्द्रो मनो बिन्दुं विकर्षयेत् ॥ यथा शरो धनुःसंस्थो यत्नेन ताडितो धावति ॥ त
थाबिन्दुर्वरारोहे उच्चारेणैव धावति ॥ अन्यत्रापि ॥ तद्रूढो मन्त्रसद्भाव इति अत्र हि त
द्दृढकृतकनिजोद्योगबलेन योगीन्द्रो मनः कर्म बिन्दुं विकर्षयेत् परमप्रकाशतां प्रापयेदि
ति ॥ तथा बिन्दुः परप्रकाशो कृतकोद्यन्तुलात्मनोच्चारेणाधावति प्रसरतीत्यर्थः ॥ मत
ङ्गेऽपि ॥ अयमेवोदयस्तस्य ध्येयस्य ध्यातृचेतसि तदात्मतासमापत्तिरिच्छतः ॥
साधकस्येत्यनेनोक्तम् ॥ ईदृशा साधकता अस्य मन्त्रस्य पूर्वोपदिष्टमंत्रो यत्नस्य प्रति ।
॥ विद्याशरीरसत्ता मन्त्ररहस्यम् ॥ विद्या पराहन्तामयी शरीरं स्वरूपं यस्य स विद्याश
२/ रीरो भगवाञ्छब्दराशिस्तस्य या सत्ता अशेषविश्वाभेदमयपूर्णाहंविमर्शात्मा स्फुरत्ता स । १३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तु मन्त्राणां रहस्यमुपनिषत् ॥ यदुक्तं श्रीतन्त्रसद्भावे ॥ सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्म
काः प्रिये ॥ शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिकेति ॥ तत्रैव चायमर्थो निरहस्येऽपि
चितत्वस्फुटीकृतः ॥ तथा च ॥ न जानन्ति गुरुं देवं शास्त्रोक्तान् समयांस्तथा ॥ दम्भको
टिल्यनिरतालौल्यार्थाः क्रियया ज्ञिताः ॥ असमानुकारणाद्देवि मया वीर्यं प्रगोपितम् ॥
तेन गुप्तेन ते गुप्ताः शेषा वर्णास्तु केवला इति । पीठिकाबन्धं कृत्वा ॥ मासानुमातृकादे
वि परतेजः समन्विता ॥ तया व्याप्तमिदं विश्वं सब्रह्मभुवनान्तकम् ॥ तत्रस्थं च यदा देवि । क्म
व्यापितं च सुरार्चिते ॥ अव्वर्णास्थो मयावर्णः स्थितः सर्वगतः प्रिये ॥ तथाहं कथयिष्यामि
निर्णयार्थं स्फुटं तत्त्वेत्युपक्रम्य ॥ मासा या क्रिः परा सूक्ष्मा निराचारेति कीर्त्तिता ॥ हृदि
स्थं वेष्टयित्वान्तः सुषुप्तभुजगाकृतिः ॥ तत्र सुप्ता महाभागे न किञ्चिन्मन्यते उमे ॥
चन्द्राग्निरविनक्षत्रैर्भुवनानि चतुर्दश ॥ क्षिप्तोदरे तु या देवी विषमूढेव सा तदा ॥ प्रबुद्धा
सा तेन नादेन परेणाज्ञानरूपिणा ॥ मथिता चोदरस्थेन बिन्दुना वरवर्णिनि ॥ ताघट्टे भ्रमवे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०वि० गेनमयतां शक्तिविग्रहे॥ भेदानुप्रथमोत्पन्नाविन्दवस्तेनिवर्त्तमः॥ उन्त्युनास्तुपदानेन
१४ कलासूक्ष्मातुकुण्डली॥ चतुष्कलमयोविन्दुः शक्तेरुदरगः प्रभुः॥ मध्यमस्यनयोरन्तर
न्तुत्वं जायते प्रिये॥ ज्येष्ठाशक्तिः स्मृतानामातुविन्दुद्वयसुमध्यगाः॥ बिन्दुनासोभमायान्ता
रेखैवाम्बनकुण्डली॥ रविनीनामसाज्ञेय उभौ विन्दुं पदन्तगौ॥ त्रिपथामाममाख्या। रू
त्यारौद्रीनाम्नानुगीयते॥ रोधिनीसामसुदिष्टामोक्षमार्गनिरोधनात्॥ शशाङ्कशक
लाकाराम्बिकार्द्धचन्द्रिका॥ एकैवेत्थं पराशक्तिस्त्रिधामातुप्रजायते॥ म्राभ्यो
युक्तविमुक्ताभ्यः सञ्जातोनववर्णकः॥ नवधावस्थनासातुनववर्णौरगलादिना॥ पञ्चम
ञ्चगानोदेविमध्यमादिरनुक्रमात्॥ तेनपञ्चविधाप्रोक्ताज्ञानव्यञ्जनाधिके॥ स्वरं द्वा
दशगादेविद्वादशस्या उदाहृता॥ अकारादिक्षकारान्ता स्थितापञ्चाशताभिदा॥ हृत्स्वा
एकारावाप्रोक्ताकारटप्रोक्ता द्वितीयका॥ त्रिगातावानुविज्ञेयाजिह्वामूलेमदाश्रिता॥ जिह्वा
गौ/ मैंवर्गानिष्पत्तिर्भवत्यत्र नसंशयः॥ एवंशब्दस्यनिष्पत्तिः शब्दव्याप्तंचराचरम्॥ इत्यादि १४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नात्रमेयन्नपरभैरवीयपराशाक्तात्मकमानत्कानपवन्येषारौद्रमारव्यशक्तिप्रसरम
भेदवैचित्र्येणागमर्वेवर्तोदयस्योक्त्वा द्वासद्गुरुद्दनाशरीराणांमंत्राणांमंत्राणांसेवभ
गवतीव्याख्यातत्स्वरूपाविद्याशरीरसत्तारहस्यमितिप्रदर्शितम्॥ मत्यागमंचमालिकामालि
नीप्रस्तारपूर्वकं मंत्रोद्धारकथनस्यायमेवाशयः॥ रहस्यागमसारसङ्ग्रहस्वरूपन्याय्यमिच्छ्य
सूत्राणामागमसंवादेभरोस्माभिः कृतइतिनास्मभ्यँसूयितव्यम्॥ एवमपिसंवादिते M
प्रागमेषांचिरहस्यार्थोनबुध्यते तस्मात्सद्गुरुसपर्याकार्या॥ एवंचमूलार्थस्तदाकस्यचलं
मं ग्रइत्यनेनकारिकाद्वयेनास्पन्दे दर्शितः॥ येषांत्वेवंविधमेतन्मंत्रवीर्यंप्रोक्तम। हाहृदा
नुसन्धानोऽपि पायिकमपि श्रीपरमेश्वरेच्छानपवनद्यदयङ्गमीभवन्तिअपित्वानुषङ्गिः
कमंत्रविन्दुनादादिकलाजनितासुमितसिद्धिषुचित्तंरोहन्तितेषाम् ॥३॥ गर्भस्वितविकासा
विशिष्टविद्यास्वमः ॥४॥ गर्भोरव्यातिर्महामायातत्तत्तदात्मकेमंत्रसिद्धिप्रपञ्चेयाभिनस्यावका
सस्ताचन्मात्रेप्रपञ्चेसन्तोषोसावेचाविशिष्टासर्वजनसाधारणाविद्याकिञ्चिज्ज्ञत्वरू

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्पो

शि॰ वि॰ पाशुद्धविद्या सैव स्वमोऽभेदनिषेधविचित्र्यात्मिकस्यान्याश्रमः ॥ नतूक्तं पानमले ॥ नेममाधा
१५ वुपसर्गाद्युत्थाने सिद्धयइति ॥ नदेनदनो बिन्दुरनो नादोरूपमस्मादनोरमः ॥ प्रवर्तनेचिरे
णैवलोभकत्वेन देहिन इत्यनेन दर्शनम् ॥ यदात्मागतनामापिभन्नीभिद्धिं विलीकृत्य प
रामेवास्थितिमवर्षीष्वात्रिपोगीननः ॥ विद्यासमुत्थाने स्वाभाविके खेचरी शिवाव
स्था ॥ प्राक् दिष्टसतत्त्वायाविद्यायाः स्वाभाविके समुत्थाने परमेशाभ्छामात्रघटि
ने मितिसिद्धत्यभाविनिसहजे समुन्मज्जने स्वबोधमग्नतनेचरतीतिखेचरीमुद्राभि
व्यज्यते ॥ कीदृशी खेचरी शिवावस्था विन्नाधस्यावस्था तु समबन्धिनी अवस्था स्वान
न्दोच्छलनात्म स्फुरतारूपा ॥ ननु बद्धा पद्मासनं योगी नाभावक्षेश्वरं न्यसेत् ॥
दण्डाकारं तु तं नाव न्यये यावत्करवत्रयम् ॥ निरुद्धमनस्त्रन्तु गर्भेश्रयेनवश्रयेरा
तु ॥ एतां बद्धा महायोगी खेगतिं प्रतिपद्यते ॥ इत्येवं संस्थानविशेषानुसरणरूपा
पितु परां गतिमेत्यर्थभावेन कुरुमार्गशानित्यथाः ॥ चरते सर्वजन्तूनां खेचरीनाम १५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सामस्त्येनेति श्रीतंत्रसद्भावे निरूपितं परसंवित्तिस्वरूपा॥ एवमिह भेदात्मकमायीय
ममस्तत्त्वोपशान्त्या चिदात्मैकस्वरूपोन्मज्जनेनैकरूपं मंत्रवीर्यं मुद्रावीर्यं वा दिष्ट
म्॥ तदुक्तं कुलचूडामणौ॥ एकं सृष्टिमयं बीजमेका मुद्रा च खेचरी॥ द्वावेतौ यस्य
जायेते सोऽतिशान्तपदे स्थित इति॥ स्पन्देऽपि॥ मंत्रवीर्यस्वरूपनिरूपणेनैव मुद्रा
वीर्यं संगृहीतम्॥ यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदमित्यर्धेनान्यपरेणापि च
चूडामणावुक्तं खेचरीस्वरूपं भङ्ग्या प्रतिपादितम्॥ तदत्र मुद्रामंत्रवीर्यासादने॥ गु
रुरुपायः॥ ॥५॥ गृणात्युपदिशति तात्त्विकमर्थमिति गुरुः सोऽत्र व्याप्तिप्रदर्शकत्वेनोपायः
उक्तं च श्रीमालिनीविजये॥ स गुरुर्मत्समः प्रोक्तो मंत्रवीर्यप्रकाशक इति॥ स्पन्दे त्वे
यमादिमात्रसिद्धत्वान्न संगृहीतम्॥ अगाधसंशयाम्भोधिसमुत्तरणतारिणीम्॥ व
न्दे विचित्रार्थपदां चित्रां तां गुरुभारतीमिति पार्यन्तिकोक्त्या चेतदपि संगृहीतमेव
गुरुर्वा पारमेश्वरी अनुग्राहिका शक्तिः॥ यथोक्तं श्रीमालिनीविजये शक्तिचक्रं तदेवोक्तं गु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू० वि० स्य चक्रं न दुष्यते इति ॥ श्रीत्रिशिरोभैरवेपि ॥ गुरोर्गुरुतरा शक्तिर्गुरुवक्त्रगता भवेदि
१६ द्विति ॥ सेवायकाशं ददत्युपायः तस्माद्गुरोः प्रसन्नात् ॥ मानकाचक्रसम्बोधः ॥ ॥६॥ शिष्य
स्याभवतीति शेषः ॥ श्रीपरात्रिंशिकानिर्दिष्टनीत्याहंविमर्शप्रथमकलानुत्तराकु
लस्वरूपा प्रसरन्त्यानन्दस्वरूपा सतीच्छेशानभूमिकाभासनपुरस्सरं ज्ञाना
त्मिकामुन्मेषदशां ज्ञेयाभासासूत्रणाधिक्येन चोनतां प्रदर्शयेच्छाभेदाद्द्रूपां वि
शुद्धिधाननकल्पतेजोमात्ररूपेण स्थैर्यात्मना चैवशीयेन रञ्जितत्वादलम्भुत्या
रूषितेनानराव स्वप्रकाशात्मीकृतमेयाभासत्वेनामतरूपेण मेयाभासरूपणमात्रं ।
तच्च बीजान्तरप्रसवासमर्थतया षण्ढाख्यबीजचतुष्टयात्मना रूपेण प्रपञ्चाप्रो
क्तानुत्तरानन्देच्छासंघट्टेन त्रिकोणबीजमनुत्तरानन्दोन्मेषयोजनया च क्रियाशक्त्या
भ्युपगमरूपमोंकारप्रोक्तं बीजद्वयस्य रूपसंघट्टेन षट्कोणाश्रूलबीजं चेच्छाज्ञान
शक्तिभ्यामपूर्णाक्रियाशक्तिप्रधानत्वाच्छक्तित्रयसंघट्टनमयं प्रदर्शयत्यर्थन्त्वि



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिष्यैकावेदनरूपं बिन्दुमुन्मील्य युगपदन्तर्बहिर्विमर्शनमयमिति तद्द्वयात्मानं विस
र्गभूमिमुद्दर्शिन्यपत्नयवान्तर्विमर्शेनानुत्तरस्यैव तद्विश्रान्तेर्विश्वं दर्शितवानिति ॥ बहिर्वि
मर्शेन तु कादिमान्तं पञ्चकपञ्चकं अइउऋऌलक्षणाभ्यः पुरुषान्तं समस्तं सपञ्चयु
नि ॥ एकैकस्याश्च शक्तेः पञ्चशक्तित्वमस्तीत्येकैकतः पञ्चकोदयः ॥ आभ्य एव शक्ति
भ्यः । शिवोक्तसंज्ञानुसारेणान्तःपुंभूमौ नियत्यादिकञ्चुकत्वेनावस्थानादन्तःस्थाख्या
समात् भूमिधारणेन विश्वधारणात् धारणाशब्देनाम्नायेषूक्तं तदुपरि भेदविगलनेना
भेदापत्त्योन्मिषत्वाद् ऊष्माभिधानां चतुर्णां वर्णानामाभासितवत्यत्र चान्ते सर्वसंक्षिप
र्य न्यायेन परिपूर्णमस्य तवर्गप्रदर्शनेन दत्तप्राणबीजप्रदर्शनं कृतं तदनुत्तरशक्त्या
याध्रिताना हतमयमिय पद्वाच्यवाचकरूपं सद्विश्वस्य संमर्शयित्वामिति प्रत्यभिज्ञापयि
तुमत एव प्रत्याहारयुक्त्यानुत्तरानाहताभ्यामेव शिवशक्तिभ्यां गर्भीकृतमेतदात्मकं सं
वेद्यं विश्वमहमंशचर्वीपात्मनेऽहं विमर्शमयत्वं यथाक्रमस्य समस्य मोक्ष श्रीमदुत्पलदेव
म १

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स०वि० पादैः। प्रकाशरूपात्मविश्रान्तिरहंभावो हि कीर्तितः॥ उक्ता च सैव विश्रान्तिः सर्वापेक्षानिरो
१७ धनः॥ स्वातन्त्र्यमथ कर्तृत्वं मुख्यमीश्वरतादि चेति। तदिदं पर्यन्तं यन्मातृकायास्तत्त्वं तन्
देव ककार सकार प्रत्याहारेणानुत्तरविसर्गसंघट्टसारेण कूटबीजेन प्रदर्शितमनेन इत्य
८/ लं रहस्यप्रकटनेनेयं विधश्च नाविद्यामातृकाया पेरेत्याम्नायसूचितप्रभावाया मातृकायाः॥
सम्बन्धिनश्च बीजस्य प्रोक्तमनुत्तरानन्देच्छादि वाक्यसमूहस्य चिदानन्दघनस्वस्वरूपसमा
सम्यग्बोधो भवति वेशमयः। सम्यक्संबोधो भवति॥ तच्च हृदि ङ्मात्रेणोद्दङ्कितमपि तु तेन त्वस्मत्प्रभुपादैः॥
श्रीपरात्रिंशिकातत्त्वालोकादौ प्रकाशितम्॥ उक्तं च श्रीसिद्धामते॥ मातृकुण्डलिनी बीज लि
जीवभूता चिदात्मिका। तज्जं पिण्डं त्विच्छोन्मेषाख्यं त्रिकं वर्गी स्मृतः॥ आद्यन्तवर्णादित्यादि
यावद्द्वै सर्गिकी कला॥ ककारादिसकारान्ता विसर्गान्तश्च या सच॥ बहिश्च हृदयेन्ना
देष परमे पदे॥ बिन्दुरात्मनि मूर्धान्तं हृदयाद्व्यापको हि सः॥ आदिमाद्यावि हीनास्तु म
न्त्राः स्युः शारदभ्रवत्॥ गुरोर्लक्ष्मणा मेनावदादि मात्यं च वेदाद्धृदं तथा सर्वमन्त्रं त्वेतनैव १७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पश्यन्तीति ।। एतच्च स्पन्दसंस्य त्रिमात्मिका शक्तिः शिवस्य पशुवर्तिनी ।। बधायैषा स्व

पक्षस्य स्वमार्गस्थानां ज्ञानानां सिद्धिप्रपादिके त्यनेनैव भङ्ग्या सूचितम् ।। ईदृशस्यास्य मोक्षका

चक्रसंग्रह्योधवतः ।। शरीरं हविः ।। ॥ १ ॥ सर्वं यन्मात्मत्वेनाभिषिक्तं स्थूलसूक्ष्मादिस्वरूपे

शरीरं तन्महायोगिनः परस्मिन्दग्नौ हूयमानं हविः ।। शरीरप्रमातृताप्रशमनेन संविदेवाग्निन्मा

त्रतामिति निविष्टत्वात् ।। यदुक्तं श्रीविज्ञानभैरवे ।। महाशून्यालये वह्नौ भूताक्षविषयादिकम्

हूयते मनसा सार्धं स होमः स्रुक्चेतनेति ।। तिमिरोद्घाटेपि यः प्रियो यः सुहृद्धल्युर्यो दा

नाद्योतिवल्लभः ।। तदङ्गभस्मशादेर्विद्युत्मनेङ्ग गनाङ्गन इति ।। अत्र हि देहप्रमातृताप्रशा

मनमेव पिराडार्थः ।। ज्ञानास्वपि ।। सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।। आत्म

संयमयोगाग्नौ जुह्वति ज्ञानदीपिते इति ।। स्पन्दस्तु यदा क्षोभः ।। प्रलीयेत तदा स्यात्परमं

पदमित्यनेनैव संगृहीतम् ।। क्षोभो देहाद्यहंप्रत्यय इति हि तद्वृत्तौ श्रीभट्टकल्लटः ।। अस्य

च ।। ज्ञानमन्नम् ।। यत्पूर्वं ज्ञानं बन्ध इत्युक्तं तद्ग्रस्यमानत्वाद्ध्रस्यमानत्वाद्योगिनामन्नम् ।।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०वि० यत्संवादितं प्राक्मत्युंचकान्तं च कलाकलापं विकारजालं प्रतिपत्तिज्ञानम्॥ येकान्त्य

१८ मानात्म्यविकल्पज्ञानं तदा सर्वं कवलीकरोति॥ अथ च यत्तत्त्वरूपविमर्शात्मकं ज्ञा

नं तदस्यात्मपरिपूर्णत्वाभिकारितया स्वात्मविश्रान्तिहेतुः तदुक्तं श्रीविज्ञानभैरवे॥

अत्रैकतमयुक्तिस्थयोन्यद्यतद्दिनाद्दिनम्॥ भरिताकेमात्रन्तर्भिरत्यन्तपूर्णातेपि॥ युक्ति

र्हितत्रटादशोत्तरशतभूमिकाज्ञानरूपैव॥ स्पन्दे॥ प्रबुद्धः सर्वदातिष्ठेदित्यन्य

थैवकारिकयादर्शितम् यदा त्वियंसनतावहितो नभवति तदाज्ञानवत्तोयस्याः धानावले

प्न पात्॥ विद्यासंहारे तदुत्थस्वप्नदर्शनम्॥ प्रोक्तज्ञानस्फाररूपायाः शुद्धविद्यायाः संहारे

निमज्जने॥ तदुत्थस्य क्रमात्क्रमन्यक्कृतविद्यासंस्कारस्य प्रस्यभेदमयस्य विकल्पप्रप

ञ्चरूपस्य दर्शनं स्फुटमुन्मज्जनं भवति॥ तदुक्तं श्रीमालिनीविजये॥ न चैतदप्रसन्नेन

शङ्करेणोपदिश्यते। कथञ्चिदुपदिष्टेपि वासनात्रैव जायते इत्युपक्रम्य। वासनामात्र

लाभेपि योप्रमत्तो न जायते॥ तमाह नित्ययुक्भोगेषु योज्ञं यत्निविनाशकारिणि॥ तदेतत्॥ अ १८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्यथानुस्वतन्त्रात्मा स्फीतिमर्कवत्नः ।। मननं लौकिकस्यबन्धा गन्तव्य मयदृष्टय इत्यनेन
स्पन्दे सङ्गृहीतम् ।। अतश्च प्रबुद्धविद्याविमर्शनपरेणैव योगिनाभाव्यमित्युपदिष्टं भव
ति ।। यथोक्तम् ।। तस्मात्सततं प्रबुद्धः स्यात् किं कुर्वीतोत मयाश्चर्ये ति श्रीपूर्वे ।। श्रीस्पन्देऽपि तस्मा
तः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये ।। जाग्रदेव निजं भावमचिरेणाधिगच्छती
ति ।। एवं चित्तं मंत्र इत्यतः प्रभृति मंत्रवीर्यमुद्रावीर्यानुसन्धिप्रधानं उच्चाररहितं वस्तु
चेतसैव विचिन्तयन् ।। यं समावेशमाप्नोति शाक्तः सोऽत्राभिधीयते ।। इत्याम्नातं शाक्तोपायं
विविच्यावधानावलिप्तप्रलिप्ति विद्यासंहारे तदुत्थस्वप्नदर्शनमिति सूत्रेणानवधानदनुषङ्गेणा
णवोपायप्रतिपादनस्यावकाशो दत्त इति शिवम् ।। इति श्रीशिवसूत्रविवृतौ शाक्तोपा
यप्रकाशनं द्वितीय उन्मेषः ।। २ ।। इदानीमाणवोपायं प्रतिपिपादयिषुरात्मनस्तावत्स्व
रूपं दर्शयति ।। आत्मा चित्तम् ।। १ ।। यदेतद्विषयवासनाच्छुरितत्वान्नित्यं तदध्यवसायादि
व्यापारं बुद्ध्यहङ्कारमनोरूपं चित्तं ।। तदेवात्मचिदात्मकस्य स्वस्वरूपाख्यात्या संतापादिवत्यव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ण्

सू० वि० लम्बनेनयोनिःस्थाने इत्यात्माऽरिष्टत्यर्थः ननुचिदेकरूपस्यास्यात्मनमास्ति ॥ अत्र रुच
चेतनत्वमात्मनि स्वभावभूतनात्विके नस्वरूपप्रतिपादनाशयेन पूर्वं मात्मालक्षितइदा
१९ दे नींत्वेनदेहसङ्कोचावभासप्रधानाशावदशोऽचित्येनेन्निनपूर्वापरयोरसम्यम् ॥ अस्यचि
नस्वरूपस्यैवात्मनः ज्ञानं बन्धः ॥ सुखदुःखमोहमयाध्यवसायादिरूपेण तदुचित
T / भेदावभासनात्मनात्मकं यज्ज्ञानं तद्बन्धः ॥ तथाभिन्नत्वादेव स्वयं संमाइति ॥ तदुक्तं श्री
तन्त्रसद्भावे ॥ सत्वस्थो राजसस्थश्च तमःस्थो गुणवेदकः ॥ एवं पर्यटते देही स्थानात्स्था
नान्तरं व्रजेदिति ॥ एतदेव तन्मात्रोदयरूपमनोबुद्धिवर्जितेन ॥ पुर्यष्टकेन संरुद्धस्त
दुत्थं प्रत्ययोद्भवम् ॥ भुंक्ते परवशो भोगं तद्भावात्संसरेदित्यनेनानूदितम् ॥ अतःसंसृ
तिप्रलयस्यास्य कारणं सम्प्रचक्ष्महे इत्यनेन तत्प्रतिविधानाय स्पन्दशास्त्रे ॥ ननु च ॥ ज्ञानं
प्रकाशकं सर्वमात्मा चैव प्रकाशकः ॥ अनयोरपृथग्भावाज्ज्ञानी ज्ञाने प्रकाशते ॥ इति
श्रीविज्ञानभैरवोक्तदृष्ट्या ज्ञानमपि प्रकाशमयमेवेति कथमस्य बन्धरूपत्वमसत्यमेन १९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त् यदि परमेश्वरप्रसादादेवं प्रत्यभिज्ञायेत् ॥ यदा तु तन्मायाशक्तितो नैव विमर्शः । त
दा ॥ कलादीनां तत्त्वानामविवेको माया ॥ किञ्चित् ॥ कर्तृत्वादिरूपकलादिक्षित्य
न्तानां तत्त्वानां कञ्चुकपुर्यष्टकस्थूलदेहतावस्थितानां योऽयमविवेकः पृथक्त्वाभिमतानां
मेवापृथगात्मत्वेन प्रतिपत्तिः ॥ सामायानत्वाख्यातिमयः प्रपञ्चः तदुक्तं श्रीतन्त्रसद्भा
वे कलोद्वलितं चैतन्यं भोग्यविद्यादर्शितगोचरः ॥ रागेण रञ्जितात्मासौ बुद्ध्यादिकरणोर्युतः ॥
एवं मायात्मको बन्धः प्रोक्तस्तस्योदरात्मकः । तदाश्रयगुणो धर्मोऽधर्मश्चैव समासतः ॥
तत्राद्यौ संस्थितः पाशः पाशितस्तत्र तिष्ठतीति ॥ स्पन्दे तु ॥ अप्रबुद्धधियस्त्वेते स्व
स्थितिस्थगनोद्यताः इत्यनेनैतद्द्वयोक्तम् ॥ तन्नश्चैतत्प्रशमनाय ॥ शरीरे संहारः क
लानाम् ॥ महाभूतात्मकं पुर्यष्टकरूपं समनान्तं च यत् स्थूलं सूक्ष्मं परं शरीरं । तत्र याः
पृथिव्यादिशिवान्ततत्त्वरूपाः कलाभागास्तासां संहारः स्वकारणे लयभावनया दा
हादिचिन्तनस्तुत्याध्यानव्याप्तिशेषः ॥ यदुक्तं श्रीविज्ञानभैरवे ॥ भुवनाध्वादिरू

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पेशाचिन्तयेत्क्रमशोविलम्॥ स्थूलसूक्ष्मापरस्थित्यायावदन्ते मनोलय इति॥ तथा
कालाग्निनाकालपदादुत्थितनस्वकंपुरम्॥ तुर्यांशेचिन्तयेदन्तेशान्ताभासः प्रजायते
इति॥ एवमादिचसर्वागमेस्वाम्ति॥ अनन्तरवश्चारकरणास्थानवर्णाध्यानप्रकल्पते:॥
योभवेत्ससमावेशः सम्यगाणव उच्यते॥ इतिश्रीपूर्वशास्त्रेध्यानाद्युपायाणावत्वेनोक्तम्
एतच्चस्थूलत्वाछाक्तोपायप्रकाशात्मनिस्पन्दशास्त्रेनसङ्गृहीतम्॥ यत्वत्रपर्यवसान
भंग्यशाक्ताद्यक्तिनदस्याभिरवस्पन्दभूत्यानंसंवादितम्॥ संवादयिष्यतेकिंचित्॥
एवंध्यानाख्यमाणावमुपायंप्रदर्श्यततेदकयोगाङ्गेमात्मानांयामधारणाप्रत्याहारस
डी/माधीन्प्रदर्शयति॥ नाडीसंहारभूतजयभूतकैवल्यभूतपृथक्तानियोगिनाभावनी
यानीतिशेषः॥ नाडीनांप्राणापानादिवाहिनीनांसुषीम्णांसंहारः प्राणापानयुक्त्या
पकेशादानवझान्तमनिमध्यनाड्यांविलीनतापादनं॥ यदुक्तंश्रीस्वच्छन्दे॥ अपसव्ये
नपूर्येनसव्येनैवतुरेचयेत्॥ नाडीनांशोधनंह्येतन्मोक्षमार्गपथस्यचेति॥ रेचनात्पूर

णाद्वैधात्प्राणायामस्त्रिधास्मृतः॥सामान्याद्बाह्यरेचनेनु पुनश्चाभ्यन्तरे त्रयः॥अभ्य
न्तरेणरेच्येत पूर्येताभ्यन्तरेणतु॥निस्पन्दं कुम्भकं कृत्वा कार्यश्चाभ्यन्तरायइति॥
भूतानां पृथिव्यादीनां जयो धारणाभिर्वशीकरः॥यथोक्तं तन्त्रे एव वायवीधारणा कु
ष्ठमानोयीनाभिमध्यतः॥माहेन्द्री कण्ठदेशेतु वारुणी च घटिकाश्रिता॥आका
शधारणा मूर्ध्नि सर्वसिद्धिकरी स्मृतेति॥भूतेभ्यः कैवल्यं चित्तस्य ततः प्रत्याहरणम्
यदुक्तं तन्त्रे एव॥नाभ्यां हृदयसञ्चाराद्यत्मनश्चेन्द्रियगोचरात्॥प्राणायामश्चतुर्थस्तु
सुप्रशान्त इति स्मृतः हृदयान्नाभौ प्राणस्य विषयेभ्यो मनसश्च तन्त्रे एव सञ्चरणादित्य
र्थः॥भूतेभ्यः पृथक्कम् तदनुपरं यच्छ स्वच्छन्दचिद्रूपात्मना॥यदुक्तं तन्त्रे एव भित्वाक्र
मेण सर्वाणि उन्मनान्तानि यानि च॥पूर्वोक्तलक्षणोदितस्वच्छन्दतां व्रजेदिति॥
भूतसन्धानभूतपृथक्त्वविश्वसंघट्टा इति पूर्वं यदुक्तं॥तस्यां भयोपायसमाविष्टस्याप्रय
त्नतोभवतीं दत्त्वा शाक्तोपायप्रयत्नसाध्यमिति विशेषः॥एवं देहभूतशुद्धिप्राणायामप्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰ वि॰

त्याहारधारणाध्यानसमाधिभिर्यो नतत्त्वरूपा सिद्धिर्भवति सा मोहावरणान्नतु ॥ तत्त्व
२१ (सूत) ज्ञाहित्याह ॥ मोहावरणात्सिद्धिः ॥ मोहयतीति मोहो माया ॥ तत्कृतादावरणात्प्रोक्तधार
णादिक्रमसमासादिना तत्त्वभोगरूपा सिद्धिर्भवति ॥ ननु परतत्त्वप्रकाशः ॥ यथोक्तं
श्रीलक्ष्मीकौलार्णवे ॥ स्वयंभूर्भगवान्देवो जन्मसंस्कारवर्जितः ॥ निर्विकल्पं परं धाम ह्य
नादिनिधनं शिवम् ॥ प्रत्यक्षं सर्वजन्तूनां न च पश्यन्ति मोहिन इति ॥ विगलितमोहस्त्वनु
मध्यमं प्राणमाश्रित्य प्राणापानयथान्तरम् ॥ आलंब्य ज्ञानशक्तिं च तत्स्थं चैवासनं ल
भेत ॥ प्राणादिस्थूलभावं तु त्यक्त्वा सूक्ष्ममथान्तरम् ॥ सूक्ष्मातीतं तु परमं स्पन्दनं लभ्यते
यतः ॥ प्राणायामः स निर्दिष्टो यस्मान्न च्यवते पुनः ॥ शब्दादिगुणवृत्तिर्या चेतसा ह्यनु
भूयते ॥ त्यक्त्वा तां परमं धाम प्रविशेत्तत्त्वचेतसा ॥ प्रत्याहार इति प्रोक्तो भवपाशनिकृ
न्तनः ॥ धीगुणान्समतिक्रम्य निर्येयं परमं विभुम् ॥ ध्यात्वा ध्येयं स्वसंवेद्यं ध्यानं तच्च वि
दुर्बुधाः ॥ धारणा परमात्मत्वं धार्यते येन सर्वदा ॥ धारणा सा विनिर्दिष्टा भवपाशनिवारिणी २१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यपरस्थेषु भूतेषु जगत्यस्मिन्समानधीः॥ शिवोऽहमद्वितीयोऽहं समाधिः स परः स्मृत
इति श्रीमत्सुजिह्वदारकनिरूपितनीत्याधारणादिभिरपि परतत्त्वसमावेश एव भवति
न तु भिन्नसिद्धिस्तदाह॥ मोहाज्जयादनन्ताभोगात्सहजविद्यॉ॰जयः॥ मोहस्याख्यात्या ॰/धा
त्मकस्य मलानन्तपाशात्मनो मायाया जयादभिभवात्॥ कीदृशात्॥ अनन्तः संस्कारप्र
शमयन्त आभोगो विस्तारो यस्य॥ तादृशात्॥ वेदनानादिधर्मस्येत्यादिना निरू
पितरूपायाः सहजविद्याया जयो लाभो भवति॥ आणवोपायस्यापि शाक्तपर्यवसा
नादित्युक्तम्॥ तथा च श्रीस्वच्छन्दे॥ समानान्तं वरारोहे पाशजालमनन्तकम्॥
इत्युपक्रम्य॥ पाशावलोकनं त्यक्त्वा स्वरूपालोकनं हि यत्॥ आत्मव्याप्तिर्भवत्ये
षा शिवव्याप्तिस्ततोऽन्यथा॥ सर्वज्ञादिगुणा ये च व्यापकान्भावयेद्यदा॥ शिवव्या
प्तिर्भवेदेषा चेतन्ये हेतुरूपिणीति ग्रन्थेनात्मव्याप्त्यन्तस्य मोहस्य जयादुन्मना
शिवव्याप्त्यात्मनः सहजविमायाः प्राप्तिरुक्ता यदुक्तं तत्रैव॥ आत्मतत्त्वं ततस्त्यक्त्वा
धा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विधानेन विनियोजयेत्॥ उन्मना सा तु विज्ञेया मनः सङ्कल्प उच्यते॥ संकल्पाक्रमनो
शि०सू०वि० ज्ञानमुन्मनं युगपत् स्थितम्॥ तस्मात् सा च परा निर्माय यस्मादन्या न विद्यते विन्दते द्यो
२२ यत्र युगपत्सर्वज्ञादिगुणामरान्॥ वेदनानादिधर्मस्य परमात्मत्वबोधनात्॥ वर्जेना
विद्योऽपरमात्मत्वेन तस्मादिति चोच्यते॥ तत्र स्थित्या व्यज्यतेऽन्तः परं परमकारणमिति॥
एवममयमासादितसहजविभवः ज्ञानद्वितीयकरः। लब्धाभिमुख्यद्विविधां तदेकव्याप्ता
ज्ञानदृकः पूर्णाविमर्शात्मकस्याहन्तापेक्षया यद्वितीयभिदन्ता वस्तुद्वयं वेद्यासात्म
कं जगत्तत्कोरधिमर्शस्य तथाविधो भवति विश्वम्- प्पसदा धिनिकल्पं स्फुरतीत्यर्थः
यथोक्तं श्रीविज्ञानभैरवे॥ यत्र यत्राक्षमार्गेण चैतन्यं व्यज्यते विभोः॥ तस्य तन्मात्र त्य
धर्मित्वाच्चिल्लयाद्भरितात्मता इति॥ श्रीसर्वमङ्गलायामपि॥ शक्तिश्च शक्तिमांश्चैव
पदार्थद्वयमुच्यते॥ शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वर इति॥ ईदृशश्चायं
सर्वदा स्वस्वरूपसमाविष्टः॥ नर्तक आत्मा॥ नृत्यत्यन्तर्निगूहितस्वस्वरूपावष्ट- २२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म्भमूलं तत्तज्जागरादिनानाभूमिकाप्रपञ्चं स्वपरिस्पन्दलीलयैव स्वभित्तौ प्रकट
यतीति नर्तक आत्मा ॥ तदुक्तं श्रीनैश्वासदेवीमहेश्वरनर्तकाख्यसप्तमपटले दे
वीकृतस्तवे ॥ त्वमेकांशेनान्तरात्मा नर्तकः कोशावस्तितेति । भट्टश्रीनारायणेनापि
धिसृष्टाशेषसद्बीजगर्भं त्रैलोक्यनाटकं ॥ प्रस्ताव्य हर संहर्तुं त्वत्तः कोऽन्यः कविः क्षमः
सर्वागमोपनिषदि श्रीप्रत्यभिज्ञायाम् ॥ संसारनाट्यप्रवर्तयिता सुप्तजगति जाग
रूक एक एव परमेश्वर इति ॥ एवंविधस्यास्य जगन्नाट्यनर्तकस्य भूमिकाग्रहणप
दबन्धस्थानं रङ्गमाह ॥ रङ्गोऽन्तरात्मा ॥ रज्यतेऽस्मिञ्जगन्नाट्यक्रीडाप्रदर्शनाशयेना
त्मनेति रङ्गः तद्भूमिकाग्रहणस्थानं अन्तरात्मा संकोचावभाससतत्त्वः शून्यप्रधानो
वा पुर्यष्टकरूपो देहापेक्षायान्तरो जीवस्तत्र ह्ययं कृतपदः ॥ स्वकरणपरिस्पन्दक्र
मेण जगन्नाट्यमाभासयति ॥ उक्तं च श्रीस्वच्छन्दे ॥ पुर्यष्टकसमावेशाद्विचरन्सर्वयो
निषु ॥ अन्तरात्मा स विज्ञेय इति ॥ एवमन्तरात्मरङ्गे नृत्यतोऽस्य प्रेक्षकाणीन्द्रियाणि ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्प॰वि॰
२३

योगिनश्चक्षुरादीन्द्रियाणि हि संसारनाशप्रकटनप्रमोदनिर्भरं च स्वरूपमन्तर्मुखतया
साक्षात्कुर्वन्ति ॥ यत्र योगप्ररूढ्याविगलितविभागां चमत्कारसम्पूर्णतामासाद
यन्ति यत्स्तुतिः'' कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति'' अस्य
च'' धीवशात्सत्त्वसिद्धिः ॥'' धीसात्त्विकस्वरूपविमर्शनविशारदा धीवशात्तद्वशात्तस्
त्वस्य स्फुरत्तात्मनः ॥ सत्त्वस्यान्तरपरिस्पन्दस्य सिद्धिरभिव्यक्तिर्भवति ॥ तात्त्विकसा
त्त्विकाभिनयसिद्धिर्युक्तिकौशलादेव लभ्यते ॥ एवं स्फुरत्तात्मकसत्त्वोल्लासनादेवास्य
सिद्धःस्वतन्त्रभावः
सिद्धः स्वतन्त्रभावः'' ॥ सहजज्ञत्वकर्तृत्वात्मकमशेषविश्ववशीकारित्वात्स्वातन्त्र्यम् ॥
यदुक्तं श्रीश्रीनाथपादैः ॥ श्रियैतस्यानन्यथाशक्तिस्सा साध्वी कालीपराकलेति ॥ श्रीस्व
च्छन्देऽपि ॥ सर्वे तत्त्वाभिभूतानि मार्गावर्णाश्च ये स्मृताः ॥ नित्यं तस्य वशास्ते वै शिव
भावनया सदेति ॥ एष परः स्वतन्त्रभावोऽस्य ॥ यथा तत्र तथान्यत्र यत्र देहे योगिनः ॥ स्वा
भिव्यक्तिर्ज्ञानात्तत्र यथा तथान्यत्र सर्वत्र सदावहितस्य सा भवति ॥ यथोक्तं श्रीस्व २३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च्छन्दे ॥ स्वच्छन्दस्थैव स्वच्छन्दः स्वच्छन्दो विचरेन्मदेति ॥ स्पन्देपि ॥ लभतेतत्प्र
यत्नेन परीक्ष्यं तत्वमादरात् ॥ यतः स्वतन्त्रता तस्य सर्वत्रेयमकृत्रिमेति ॥ नचैवमप्यु
दासीनेनानेन भाव्यम् ॥ अपितु । बीजावधाने ॥ कर्तव्यमिति निर्बोधः ॥ बीजं विश्वकार
णं स्फुरत्तात्मा पराशक्तिः ॥ यदुक्तं श्रीमत्युजिद्भट्टारके सायोनिः सर्वदेवानां श
क्तीनां चाप्यनेकधा ॥ अग्नीषोमात्मिका योनिस्ततः सर्वं प्रवर्तते इत्यादि तत्र परश
क्त्यात्मनि बीजे यथा तत्वं भूयो भूयः अवधानं निवेशनं कार्यम् ॥ एवं हि सत्यसौ ॥ आस
नस्थः सुखं ह्रदे निमज्जति ॥ आस्यतेनेन नित्यमैकात्म्येन स्थीयते स्मिन्नित्यासनं ॥
परं शाक्तं बलं यस्तत्रावतिष्ठति ॥ परिहृतपरापरध्यानधारणादिसर्वक्रियाप्रयासो
नित्यमन्तर्मुखतया तदेव परामृशन्नियतः ॥ ससुखमनायाससततया ह्रदे विश्वप्रवाह
प्रसरहेतौ स्वच्छे उच्छलनादियोगिनि परामृतसमुद्रे निमज्जति ॥ देहादिसंकोच
संस्कारत्रोडनेन तन्मयीभवति ॥ यदुक्तं श्रीमत्युञ्जिद्भट्टारके ॥ नोर्ध्वे ध्यानं प्रयु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ञ्जीतनाधस्तान्नचमध्यतः॥ नाग्रतः पृष्ठतः किञ्चित्पार्श्वयोरुभयोरपि॥ नान्तः
शरीरसंस्थं तु नयाह्येभावयेत्क्वचित्॥ नाकाशे बन्धयेल्लक्ष्यं नाधोदृष्टिं निवेशयेत्॥ न
चाक्षोन्मीलनं किञ्चिन्न किञ्चिद्दृष्टिबंधनम्॥ आवलम्बं निरालम्बं सालम्बं नैव
भावयेत्॥ नेन्द्रियाणि न भूतानि शब्दस्पर्शरसादयः॥ एवं त्यक्त्वा समाधिस्थः के
वलं तन्मयीभवेत्॥ सावस्था परमा प्रोक्ता शिवस्य परमात्मनः॥ निराभासं पदं तत
स्माप्य न निवर्तते इति॥ न देव नाडीसंहाराद्याणाद्युपायक्रमादि नमो हृज्ययोत्पु
घ्रा/ ज्ञस्फुटविमर्शात्मकशाक्तबलासादनप्रकर्षादात्मीकृतपरामृतहृदात्मकशांभ
वपदयोगी॥ स्वमाहात्म्यानि मीलनामायादर्पयति॥ तस्य चैतन्मस्यसम्बाध्विनीमात्राविद्
द्ध्साध्याननात्मांशास्तद्रूपं यथेष्टं वे घवेद्काव भ्रासात्मकं निमीलनामायादय
तिनिर्मलत्वेन दर्शयति॥ यदुक्तं श्रीस्वच्छन्दे॥ न देव भवति स्थूलं स्थूलोपाधि
वशात्प्रिये॥ स्थूलसूक्ष्मविभेदेन न देकं संव्यवस्थितम् इत्यपि प्रत्यभिज्ञायाम २५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पि॥ आत्मानमनन्यमेवायं ज्ञो यो कुर्यात्पृथक्स्थितिं ज्ञेयं नात्येति॥ आगमोपि ज्ञलं
हिमं च यो वेद गुरुवक्त्रागमात्प्रिये॥ नास्ति चैतस्य कर्तव्यं तस्यापश्चिमजन्म
तेति॥ अनेनैव चाशयेनोक्तम्॥ एतदेव॥ इति चायमस्य संचित्तिः क्रीडात्वेना
खिलं जगत्। स पश्यन्सततं योगी जीवन्मुक्तो न संशय इत्यनेन स्पन्दे प्रतिपा
दितम्॥ न चैवं स्वशक्तिनिर्मितभूतभावशरीरवतोस्य जन्मादिबन्धः कश्चि
दित्याह॥ विद्याविनाशे जन्मविनाशः॥ प्रोक्तायाः सहजविद्यायाः अविना
शे सततोन्मग्नतयास्फुरणे जन्मनोज्ञानसहकारिकर्महेतुकस्य दुःखमयस्य
देहेन्द्रियादिसमुदायस्य नाशो विध्वंसः संपन्न एव॥ यदुक्तं श्रीकरालाम्
संप्रपञ्चं परित्यज्य हेयोपादेयलक्षणाम्॥ रागादिकं तथा परोपायाशां
सचराचरम्॥ शिवाद्यवनिपर्यन्तं भावोपबृंहितम्॥ सर्वं शिवमयं ध्यात्वा
भूयो जन्म न चाप्नुयात्॥ श्रीस्वच्छन्दे॥ स्वनिर्वाणपरं शुद्धं गुरुरूपं पराग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नम्॥ नाहं दितिराविमुच्येत गत्वा भूयो न जायते इति॥ श्रीमत्स्युजित्यपि॥ त

त्वत्रयविनिर्मुक्तं शाश्वतं त्वचलं ध्रुवम्॥ दिव्येन योगमार्गेण दृष्ट्वा भूयो
न जायत इति॥ यदानुसुद्धविद्या स्वरूपमस्य निमज्जति तदा॥ कवर्गादि
षु माहेश्वर्याद्या योगमुपातरः॥ माधिष्ठात्र्यो भवन्तीति बोधः पाशाशक्तिजे
गन्धानुः कथितास्समवाधिनी॥ इच्छात्वं तस्य सादिविसर्गः प्रतिपद्यते॥
एकापि सत्यनेकत्वं यथायाति तथोच्यते॥ एवमेतादिति ज्ञेयं नान्यथेति सुनिश्चि
तम्॥ ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते॥ एवंभूतमिदं वस्तु भवत्विति यदा पुनः
जातानदैव तत्तद्वत्कुर्वन्त्यत्र क्रियोच्यते॥ एवं सैषा द्विरूपापि पुनः भेदैरनन्तता॥ अ
र्थोपाधिवशाद्या प्राचिन्तामणिरिति वैखरी॥ तत्र तावत्समापन्नमातृभावा विभिद्यते॥
द्विधा च नवधा चैव पञ्चाशद्धा च मालिनी॥ बीजयोन्यात्मकाद्भेदात् द्विधा बीजं स्वनाम
तः॥ कादिभिश्च स्मृता योनिर्नवधा वर्गभेदतः॥ बीजमत्र शिवः शक्तिर्योनिरित्यभि २५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धीयते ॥ वर्गाष्टकविभेदेन माहेश्वर्यादिवाष्टकम् ॥ प्रतिवर्णविभेदेन शतार्द्धकिरणोज्वला ।
रुद्राणां वाचकत्वेन तत्तत्संस्थानानि वेशितेति श्रीमालिनीयके ध्वनिरूपितनीत्या पारमे
श्वरी परा या क्रमशन्तिरिच्छाज्ञानक्रियारूपतामाश्रित्य बीजयोनिवर्गवर्ग्यादिरूपां शिवशक्तिमा
हेश्वर्यादिवाचकामादिक्षान्तरूपां मातृकात्मतामाश्रित्य सर्वप्रमातृष्वविकल्पकसविकल्प
कतत्संवेदनदशास्वन्तःपरामर्शात्मना स्थूलसूक्ष्मशब्दानुवेदनं विदधाना ॥ वर्गवर्ग्यादि
देवताधिष्ठानादिद्वारेणास्मय हर्षभयरागद्वेषादिप्रपञ्चं प्रपञ्चयन्त्यसङ्कुचितस्वत
न्त्रचिद्घनस्वस्वरूपमाच्छादयाना ॥ सङ्कुचितपरतन्त्रदेहादिमयत्वमापादयति ॥ तदुक्तं । पा
श्रीतिमिरोद्घाटेऽपि ॥ करन्ध्रचितिमध्यस्था ब्रह्मपाशावलम्बिकाः । पीठेश्वर्यो महाघोरा
मोहयन्त्यो मुहुर्मुहुरिति ॥ पूर्वमपि संवादितम् ॥ ज्ञानाधिष्ठानं मातृकेति सामान्येनोक्तमिदं तु प्रा
मनत्वेऽपि प्रमातृत्वमाहेश्वर्यादिभिः पशुजनाधिष्ठानभूताभिरपि शब्दानुवेधद्वारेण मोहयतेऽ
त्याशयेनेति विशेषः ॥ यत एवमतः शुद्धविद्यास्वरूपमुक्तयुक्तिभिरासादितमपि ॥ यथा नन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्यन्तितथासर्वदशासुयोगिनामवधानेनभवितव्यमित्याह॥ त्रिषुचतुर्थंतैलवदासेच्य
म्॥ त्रिषुजागरादिपदेषु॥ चतुर्थंशुद्धविद्याप्रकाशरूपंतुर्यानन्दरसात्मकंधाम॥ तैलव
दितियथातैलंक्रमेणाधिकमधिकंप्रसरदाश्रयंव्याप्नोति॥ तथासेच्यंत्रिष्वपिपदेषून्मे
षोपशान्त्यात्मकाद्यन्तकोटिस्फुरतातुर्यरसेनमध्यदशामप्यवष्टंभयुक्त्याव्याप्नु
यात्॥ येनतन्मयीभावमाप्नुयात्॥ जाग्रत्स्वप्नसुषुप्तेषुतुर्याभोगसंभवइत्यनेनोद्यमशा
क्तिचक्रानुसन्ध्यवष्टंभभाजःस्वरसप्रसरज्जागरादिषुपदेषुसततमात्रंतुर्यस्योक्तं॥ त्रित
यभोक्तावीरेशइतिश्रीभैरवोपायानुगुणहठपाकयुक्त्यादलकल्पंजागरादित्रयंतुपरमासि क्तः
क्तंकार्यमित्युक्तमितिविशेषः॥ अत्रोपायमाह॥ मत्सुःस्वचित्तेनप्रविशेत् प्राणादिस्थूल
भावंतुत्यक्त्वासूक्ष्ममथान्तरम्॥ सूक्ष्मातीतंपरंस्पन्दंलभ्यतेयतइत्युपत्रस्यप्रविशेत
स्वचेतसेतिमन्त्राजिह्वद्वारकनिरूपितनीत्याप्राणायामध्यानधारणादिस्थूलोपायाप्त्य
रित्यज्यस्वचित्तेनाविकल्पकरूपेणान्तर्मुखान्तर्विमर्शचमत्कारात्मनासंधृत्यतेनप्रवि वे



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शो त्समाविशेत्॥ श्रीहृदकमम्बः शरीरप्राणप्रमात्‌तां॥ तत्रैवचिश्चमत्कारवसेमज्जनेन प्रशामयन्॥ तदुक्तं श्रीस्वच्छन्दे व्यापारं मानसंत्यक्त्वा बोधमात्रेतियोजयेत्॥ तदाशिवत्व मभ्येतिपशुर्मुक्तोभवार्णवात्॥ श्रीज्ञानभट्टारकेपि॥ मानसंचेतनाशक्तिरात्माचेतिचतुष्टय म्॥ यदाप्रियेपरिक्षीणांतदातद्भैरवंवपुरिति॥ इतिदेवज्ञानगर्भस्तोत्रे॥ विहायसकलाः क्रियाजननिमानसीः सर्वतोविमुक्तकरणक्रियानुसृतिपारतंत्र्योज्वलाम्॥ स्थितैस्त्वत्त्व दनुभावतः सपदिवेद्यतेसादशापरानुभिरतन्द्रितासमसुखाम्तस्पन्दितीति॥ अनेनम हागुरुभिनिरूद्धम्॥ इत्थंचपरमपदप्राप्तिस्यास्यवस्तुस्वाभावाद्यदाप्तुत। प्रसरणभव नितदा॥ आशासमाचारेमम दर्शयन्॥ परस्फुरतात्मकशान्तपरिमलसंस्फुरणस्यसम्यग्ग तिविकासितसमप्रशान्तिकान्तराचष्टंभबलादाईषदृहिर्मन्दमन्दचारेप्रसमंविदानन्द घनात्मतयैकरूपंदर्शनंसंवेदनमर्थात्सर्वदशास्वरूपभवतीत्यर्थः॥ उक्तंचश्रीमदानन्द भैरवे॥ उत्सृज्यलौकिकाचारमद्वैतंमुक्तिदंश्रयेत॥ समर्थंसर्वदेवानांनदायर्णाश्रमादि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰ वि॰ दिके ॥ इत्याशांसमनादर्शो सम्युक्तः सर्वबन्धनैरिति ॥ एतदेव श्रीप्रत्यभिज्ञायाम् ॥ बुद्धि
२७ प्राणाप्रसरेऽपि या ह्युदेशाद्युपादानानाहितसंकोचानां विभ्रान्त्स्वरूपलाभ एवेत्युक्तम्
यदा त्वस्य सुखदुःखाद्यवेद्यानावष्टम्भप्रकर्षेण लब्धं तुर्यानीलपदमेव समयनसमाविशति ॥ अ
पि तु पूर्वापरकोटिसंवेद्य तुर्यचमत्कारमात्रमेव सततं व्युत्थानात्मेन तदास्य ॥ मध्येवरप्रसवः ॥ व
पूर्वापरकोट्योस्तुर्यरसमात्वादयतो मध्ये मध्यदशायामवरः ॥ अश्रेष्ठः प्रसवो व्युत्था
नात्माकृत ॥ सिनः सर्गो जायते ॥ ननु विद्यासंहारे तदुत्थस्वप्नदर्शनमित्युक्तं सूत्रार्थिनी
त्यात्तदाप्यासु घटेतीत्यर्थः उक्तं च श्रीमालिनीविजये ॥ यावत्तामात्रलाभेऽपि योऽप्रमत्तो न जा
न जायते ॥ तमभित्येषु भोगेषु योजयन्ति विनायकाः ॥ तस्मान्नैषु संसक्तिं कुर्वीतो नम
यान्ध्यपेतिप्रापतपि संवादितम् ॥ एवमेव प्रसवोऽपि प्रवर्तेय यदि तुर्यरसावष्टम्भेन मध्यप
दं पुनरपि विश्रान्ति तदा ॥ मात्रास्वप्रत्ययसन्धाने नष्टस्य पुनरुत्थानम् ॥ मात्रासु रागादार्थे
षु स्वप्रत्ययसन्धानं ॥ चक्षुषा यद्दृश्यं येन वाच्यं या पश्यगोचरः । मनः श्वित्रयते याति बुद्धि २७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्चे वाध्यवसीति॥ अहंकृतानियान्यैर्ययश्च वेयनया स्थितम्॥ यश्चना क्लिमनत्रैव तत्त्वेष्वयः प्रप
ल्लनइति श्रीस्वच्छन्दे निरूपितनीत्या विश्वमिदमहमिति चिदघनात्मरूपतां सर्वत्रानुसन्दध
तः पूर्वोक्तावरप्रसवाल्लब्धस्यापरिहारितनतत्त्वैकघनचमत्कारमयस्वभावस्य पुनरुत्थानमुद्रा
नं॥ तदेकरससम्पत्तिं पूर्णात्वं योगिनो भवतीत्यर्थः॥ तदुक्तं श्रीस्वच्छन्दे॥ प्रमध्रुवं च्चलीत्येव योगिना
मपि यन्मनइत्युपक्रम्य॥ यस्य ज्ञेयमयोभावः स्थिरः पूर्णः समन्ततः॥ मनोऽमचलनेनतस्य सर्वाव
स्थागतस्य तु॥ यत्रयत्र मनोयाति ज्ञेयं तत्रैव चिन्तयेत्॥ चलित्वा यास्यते कुत्र सर्वं शिवमयं यतः
इति॥ विषयेषु च सर्वेषु इन्द्रियार्थेषु च स्थितम्॥ यत्र यत्र निरूप्येत नाशिवं विद्यते क्वचिदिति
इत्युपमासादितप्रकर्षो योगी॥ शिवतुल्यो जायते॥ तुल्यपदविशीरुतप्रकर्षो न्यामतुर्यतीतीनपद
परिपूर्णः स्वच्छस्वच्छन्दचिदानन्दघनेन शिवेन भावनातुल्यः देहकलायां यावदविगलना
त्तस्मोजायते॥ तद्विगलने तु साक्षात्स्वच्छन्द एवासावित्यर्थः॥ तथा च श्रीकालिकाक्रमे॥ तस्मान्नि
त्यमसन्दिग्धं तु द्वा योगी गुरोर्मुखात्॥ अविकल्पेन भावेन भावयेत्तन्मयः स्थितः॥ यावत्तन्मयतां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 मानिभगवान्भैरवोऽब्रवीत् इति ॥ एवमपिचयेनेदंतद्भोगानइत्याम्नायोक्त नीत्योपनत
 भोगान्निर्वाहनमात्रप्रयोजनादेहस्थितिरस्यनातिक्रमणीयेत्याह ॥ शरीरवृत्तिरन्नम् ॥
प्रोक्तइत्थाशिवतुल्यस्ययोगिनःशिवाहंभावेन वर्तमानस्य शरीरे वृत्तिर्वर्तनं ॥ यतदेवअन्नम् म
स्वस्वरूपविमर्शात्मकनित्योदितपरपूजानन्दरस्यानियमेनानुष्ठेयमस्य ॥ तथाचश्रीस्वच्छ
न्दे ॥ सुप्रदीप्तेयथावन्हौशिखाद्दश्यतेनचाम्बरे ॥ देहप्राणस्थितोप्यात्मानहृश्यीयेनतत्पदे इत्यु
क्त्वादेहप्राणावस्थितस्यैवशिवसमावेशत्वमुक्तम् ॥ तद्युनतस्यदेहस्थितिव्यतिरिक्तंब्र
तमुपयुक्तम् ॥ यदुक्तं श्रीत्रिकसारे ॥ देहस्थिताभिर्मुद्राभिर्यः सदा मुद्रितो बुधः सतु मुद्रा
धरः प्रोक्तः शेषा वै अस्थिधारका इति ॥ श्रीकुलपञ्चाशिकायामपि ॥ अव्यक्तलिंगिनं दृष्ट्वा
संभाषन्तो मरीचयः ॥ लिङ्गिनं नोपसर्पन्ति घ्नतिगुप्ततरायतः ॥ एवंविधस्याऽस्यकथाजपः ॥
अहमेवपरोहंसः शिवः परमकारणम् ॥ इति श्रीस्वच्छन्दनिरूपितनीत्या नित्यमेवपराहंभा
वनामयत्वात् ॥ तस्यदेवातिदेवस्य परबोधस्वरूपिणः ॥ विमर्शः परमा शक्तिः सर्वज्ञज्ञान 

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शालिनीनिकालिकानिरूपितनीत्यामहामन्त्रात्मकाकूनकाहंविमर्शीरूढस्यप्रद्युदाला
पादिनतदस्यस्वात्मदेवताविमर्शनानवरतावर्तनात्याज्जपोज्ञायते॥यदुक्तंश्रीविज्ञानभैरवे॥
भूयोभूयःपरेभावेभावनाभाव्यतेहिया॥जपःसोत्रस्वयंनादोमंत्रात्माजप्यईदृशाइति॥त
था॥सकारेणबहिर्यातिहकारेणविशेत्पुनः॥हंसहंसेत्यनेनमंत्रंजीवोजपतिनित्यशः॥षट्
शतानिदिवारात्रौसहस्राण्येकविंशतिः॥जपोदेव्याविनिर्दिष्टःसुलभोदुर्लभोजडैरिति॥
ईदृग्जपश्चव्रतवतोस्यचर्यामाह॥दानमात्मज्ञानम्॥भोक्तृचैतन्यरूपस्यात्मनोयज्ज्ञानंसाक्षा
त्कारस्तदस्यदानं॥दीयतेपरिपूर्णस्वरूपंदीयतेखण्ड्यतेविश्वभेदः॥दायतेशोध्यतेमाया
स्वरूपं॥दीयतेरक्ष्यतेलब्धःशिवात्मास्वभावश्रद्धानेनेतिकृत्वा॥अथचदीयतेइतिदानमा
त्मज्ञानमेवानेनान्तेवासिभ्योदीयते॥तदुक्तम्॥दर्शनात्स्पर्शनाद्वापिवितनाद्भवसागरात्॥ना
रयिष्यंतियोगीन्द्राःकुलाचाराप्रतिष्ठिताइति॥यश्चोक्तदृशाशिवतुल्यस्तयानित्यमेवव्रत
जपचर्यानिष्ठत्वान्निजशक्तिचक्रारूढः॥सएवतत्वतउपदेश्यानांप्रतिबोधकइत्याह॥योऽप

वि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०वि० स्योज्ञाहेतुश्च ॥ अथोन्यपश्रून्यातीत्यविपंकवर्गादिषुमाहेश्वर्याद्याः ॥ पशुमातरइत्यभि
२९ हितदशामाहेश्वर्यादिशक्तिचक्रं ॥ नञ्जतिदधति ॥ चिदितत्स्वभाह्यात्म्यत्वात् ॥ प्रभुत्वेनपः प्र
तपभिसज्ञाहेतुः ॥ ज्ञानातीतिज्ञा ज्ञानशक्तिस्तस्याहेतुरूपदर्शयन् ज्ञानशक्त्याप्रतिबोधयि
तुं क्षमः ॥ अन्यत्तुशक्तिचक्रपरतन्त्रीकृतात्वात्पशुरूपप्रभविष्णुः ॥ कथमनन्यन्प्रबोधयेत्
यश्चेद्धं बोपेत्तयानश्वच्छेदोत्र सूत्रेध्याहार्यः ॥ चशब्दोत्रर्थे योयमविपस्थः ॥ सयस्मात्ज्ञानप्र / ग्र
बोधनहेतुस्तस्माद्युक्तमुक्तं दानमात्मज्ञानमिति ॥ अन्ये त्वज्ञरसात्स्यात्प्रबुद्ध्यादिनिरू
क्तिस्थित्यायोइतियोगीन्द्रः ॥ धीनिविज्ञानं येनितपदं ॥ स्थेतिपदस्यः इत्यस्मान्त्यमत्तरं ॥ ज्ञेति
ज्ञाता ॥ हेतिहेयः ॥ त्यितितुश्चला ॥ विसर्जनीयेनविसर्गशक्तिः ॥ चकारेणानुक्तसमुच्चयार्थे
नकर्त्तापरामृश्यत इत्याश्रित्य ॥ योगीन्द्रो विमर्शशक्त्यास्वस्वरूपात्मकविज्ञानपदस्थः स
ज्ञाताकर्त्ताचधगन्तव्यस्तदायास्यहेयंतुश्चलं निस्सारतां तरूपादेयतामासादयतीति व्याचख्यु २९
ते ॥ एतश्चतनप्रतिभाति ॥ पदार्थेसङ्गतेर्मलिनत्वात् ॥ इति सूत्रं चेद्दृशोव्याख्याक्रमस्यस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ ॥

हृश्यो दर्शयितुं शक्यत्वात् ॥ अस्य च ॥ स्वशक्तिप्रचयोऽस्य विश्वम् ॥ यतोऽयं शिवतुल्य उक्त
स्ततो यथा शक्तेयोऽस्य जगदात्मत्वमित्याम्नायदृष्ट्या शिवस्य विश्वं स्वशक्तिमयं ॥ तथास्यापि
स्वस्याः संविदात्मनः शक्तेः प्रचयः क्रियाशक्तिस्फुरणारूपोऽधिकासो विश्वम् ॥ यदुक्तं श्री
मृत्युजिति । यतो ज्ञानमयं देवि विज्ञेयं चैव हृधा स्थितम् ॥ नियन्त्रितानां सर्वेषां प्राणानां तत्र
मुच्यते ॥ कालिकाक्रमेऽपि तद्रूपतया ज्ञानं बहिरन्तः प्रकाशते ॥ ज्ञानादृते नार्थसत्ता ज्ञान
रूपं ततो जगत् ॥ न हि ज्ञानादृते भावाः केनचिद्विषयीकृताः ॥ ज्ञानं तदात्मतां प्राप्तमेतस्मा
दवसीयते ॥ अस्ति नास्ति विभागोऽत्र निषेधविधियोगतः ॥ ज्ञानात्मना ज्ञेयतिरोभावानां भा
वनावत्त्वात् ॥ युगपद्वेदनाज्ञानज्ञेययोरेकरूपतेति ॥ न केवलं सृष्टिदशायां निजशक्ति
यौ विश्वं यतत्त्वस्वभावतो ॥ स्थितिलयौ ॥ स्वशक्तिप्रचय इत्यनुवर्तते ॥ क्रियाशक्त्याभासितस्य
विश्वस्य तत्तत्प्रमात्रपेक्षकं चित्कालं बहिर्मुखत्वावभासनरूपा या स्थितिः प्रत्ययप्रमातृवि
श्रान्त्यात्मा यो लयस्तावेव तस्य स्वशक्तिप्रचयरूपौ । ननु द्वयं स्वभासमानं विलीयमानं च नि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्व॰ वि॰ जसंविन्मात्रात्मकमेवामथान्यस्यसंवेदनानुपपत्तेः ॥ अत एव श्रीकालिकाक्रमे ॥ आस्ति
३० नास्तिविभागेनेत्यादिस्थितिलयपरत्वेनोक्तम् ॥ तथा ॥ सर्वमुद्दिशलक्ष्यंज्ञानंस्वप्रत्ययात्मक
म् ॥ यः पश्यति स मुक्तात्माजीवन्नेवनसंशयः ॥ नन्वेवं सृष्टिस्थितिलयानां स्वान्योन्यभेदावभा
समयोगस्यस्वरूपान्यथात्वमायातमित्याशंकाशान्त्यर्थमाह ॥ तत्प्रवर्तनावप्यनिरासः संवे
तभावात् ॥ तथा सृष्ट्यादीनां प्रवर्तनावप्युन्मज्जनेपिनास्ययोगिनः ॥ संवेतभावात्तुर्यचमत्का
रात्मकविमर्शमयात्प्रच्युतलक्षणान्निरासः स्खलनम् ॥ तन्निरासे कस्यचिदप्यप्रकाशनात् ॥ यदुक्तं तत्रै
व ॥ नाशो विद्याप्रपञ्चस्य स्वभावेन स्यात्मि ॥ उत्पत्तिध्वंसविरहात्तस्मान्नाशो न वास्तवः ॥ यतो वि
द्यासमुत्पत्तिध्वंसाभ्यामुपचर्यते ॥ यत्स्वभावेन नेनोन्नृभ्रंतत्वध्वंसं कथमुच्यते इति ॥ एतदेव स्प
न्दे ॥ अवस्थायुगलं चात्र कार्यकर्तृत्वशब्दितम् ॥ कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम्
तथा कार्योन्मुखः प्रयत्नो यः केवलं सोत्र लुप्यते ॥ तस्मिंल्लुप्ते विलुप्तोस्मीत्यबुधः प्रतिपद्य त्य
ते ॥ न तु योन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदम् ॥ तस्य लोपः कदाचित्स्यादन्यस्यानुपलंभ ३०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नात्॥ इत्यनेनोक्तम्॥ अस्य योगिनः॥ सुखासुखयोर्बहिर्मननम्॥ वेद्यस्पर्शजातयोः॥
सुखदुःखयोर्बहिरिव नीलादिवदिदन्ताभासरूपतया सतनं संवेदनम्॥ ननु लौकि
कवदहन्तासंस्पर्शनेनाप्यहिस्य शक्तिप्रचयोऽस्य विध्य इत्युक्तमत्र नीत्या सर्वमहन्ता
च्छादितत्वेन स्फुरति॥ ननु नियतं सुखदुःखादीत्येवं परमेनन्॥ योगी प्रशान्तपुर्य
ष्टकप्रमातृभावः कथं सुखदुःखाभ्यां स्पृश्यते॥ तथा च श्रीप्रत्यभिज्ञायाम्॥ ग्राहक
भूमिकोत्तीर्णानां वास्तवप्रमातृदशापन्नानां तत्त्वहेतूपस्थापितसुखदुःखमात्राका
रेपितसुखदुःखादि॥ तेषां नोपघ्नन्त्येव॥ सुखादि हेतु वै कस्मात्॥ सहजानन्दादिर्भाव
स्तु न दास्यादित्युक्तम्॥ अनत्वर्वदुःखं न सुखं यत्र न ग्राह्यं ग्राहको नच॥ न चास्ति मूढभा
वोपि तदस्ति परमार्थतः इति स्पन्देन निरूपितम्॥ यतश्चानौ पुर्यष्टकप्रमातृभावस्य योगि
नोनात्मः सुखदुःखसंस्पर्शोनि ग्वा सौ॥ तद्विमुक्तस्तु केवली॥ ताभ्यां सुखदुःखाभ्यां विशे
षणामुक्तः॥ संस्कारमात्रेणाप्यन्तरसंस्पृष्टः केवली केवलं चिन्मात्रप्रमातृतारूपं यस्य।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्व॰ वि॰ तदुक्तं श्रीकालिकाक्रमे ॥ सुखदुःखादिविज्ञानविकल्पानल्पकल्पितम् ॥ भित्वाद्वैतम
३१ हामोहं योगी योगफलं लभेदिति ॥ तुषादौ वस्य मागतापेक्षया विशेषद्योतकः ॥ एवमुन्म
ग्नस्तत्रगतोप्येतत्स्वापेक्षया ॥ यदाह ॥ मोहप्रतिसंहतस्तु कर्मात्मा ॥ मोहेनाज्ञानेन प्रतिसं
हतस्तदेकघनस्तत एव सुखदुःखाद्यपायः स पुनः कर्मात्मानित्यं शुभाशुभवलंकि
तः ॥ तदुक्तं तत्रैव पदविधारणतया विकल्पविधियोगतः ॥ शिवादीन्नैव कर्टितिस
शुद्धावयपतेखिलान् ॥ ततः शुभाशुभाभावालक्ष्यन्ते न दृशान्वतः ॥ अशुभेभ्यश्च भावे
भ्यः परं दुःखं प्रजायत इति ॥ एवमीदृशस्यापि कर्मात्मनो यदा तर्गलमाहेशशक्तिपा
तवशोन्मिषितसहजस्वातंत्र्ययोगी भवति ॥ तदास्य भेदनिराकारे सर्गान्तरकर्मत्वम् ॥
शरीरप्राणाद्यहन्ताभिमानात्मनः ॥ सकलप्रलयाकलादिप्रमातृचित्तस्यापि ॥ चिद
घनस्वभावो मञ्जनादयहन्तनेसन्तिक्रमेशामन्त्रमन्त्रेश्वरमन्त्रमहेश्वरात्मकस्वमाहा
त्म्याविर्भावो सर्गान्तरकर्मत्वं ॥ यथाभिलषितनिर्माणनिर्मातृत्वं भवति ॥ तथा च श्रीस्वच्छन्दे ३१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रिगुणेनानुगतेनास्य च्छन्दसः ह्यशोभावेदितम् ॥ स्वच्छन्दस्वाद्यश्चेयेन भेदो निरस्कारमस्योक्तः ॥
ब्रह्मविष्णुरुद्रदेवानां सिद्धदैत्योरगोषिनाम् ॥ अभयदानान्महतो चषापानुग्रहकृद्भवेन ॥
इत्यहर्निकालस्य यानयेद्धूधरानपीत्युक्तम् ॥ न चैनदस्यात्तस्मात् प्रयुज्यते ॥ करणाशक्तिः
स्वतोनुभवान् ॥ स्वतः स्वस्मादेवानुभवात्संकल्पस्य मादौ करणाशक्तिमन्नदसाधार
णार्थानिर्मातत्वमात्मनः ॥ सिद्धमेव अनेनैवाशयेन श्री प्रत्यभिज्ञायाम् ॥ अतएव यथा
भीष्टसमुल्लेखावभासनात् ॥ ज्ञानक्रिये स्फुटे एव सिद्धे सर्वस्य जीवत इत्युक्तम् ॥ तथा सं
भवाद्यदि चेन्नद्धा महाभिनिवेशेनाधिसृष्टानि तदासर्वसाधारणाभीष्टाद्यभिमाततापिभ
वन्तितदुर्लक्षं तत्त्वार्थे ॥ यदानुनेपि मुख्यकस्य सामर्थ्ये गुणोऽच्चलाः ॥ भवेद्दृढतरादूरदा
रिनादादोदीननता ॥ नदाचनैषां संकल्प फलपादमेतां व्रजेदितियन्तश्च करणाशक्तिश
ब्दोक्कालयोन्मास्य तं स्वशक्तिय स्वबोधरूपस्य प्रमातः सारमनोमायाधाकारहस्तितन
नचरूपोलेजनाय ॥ त्रिपदाद्यनुसारात्मम् ॥ अयाराणां भावो मुख्यतदभिव्यङ्गतदन्तर्मु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्वीभावनामयानां सृष्टिस्थितिलयप्रवाहोक्तानां पदानामवस्थानां पदादिप्रधानं चमत्कृ
ननित्वेनानन्दघनं तुर्याख्यं पदं मायाशक्त्याच्छादितानामर्पितनद्विषयोपभोगाद्यवस
रेषु विद्युद्वदाभासमानं ॥ तेन तदवसरेषु स्नामात्रोदितेनाप्रनुप्राशानमन्तर्मुखत्वेन
द्विमर्शात्मस्थितितारतम्येनानुगततयाप्राशानमात्मनस्तने यातायितेनापि प्रवि
नस्मोलितनं कुर्यात् ॥ तदुक्तं श्रीविज्ञानभैरवे ॥ अन्तःस्वानुभवानन्दविकल्पोन्मु
क्तगोचरा यावस्थाभरिताकाराभैरवीत्मनः ॥ तद्वपुस्तत्त्वतो ज्ञेयं विमलं विश्वपूर
णमित्याद्युपक्रम्य ॥ शक्तिसङ्गमसंक्षुब्धशक्त्यावेशावसानिकम् ॥ यत्सुखं ब्रह्मतत्त्व
स्य तत्सुखं स्वाक्यमुच्यते ॥ लेहनामन्थनाकोटैः स्त्रीसुखस्य भरात्स्मृतेः ॥ शक्त्यभा
वेपि देवेशि भवेदानन्दसंप्लवः ॥ आनन्दे महति प्राप्ते दृष्टे वा बान्धवे चिरात् ॥ आ
नन्दमुद्गतं ध्यात्वा तन्मयस्तल्लयीभवेत् ॥ जग्धिपानकृतोल्लासरसानन्दविजृंभणात् ॥
भावयेद्भरितं भावं महानन्दमयो भवेत् ॥ गीतादिविषयास्वादासमसौख्यैकतात्मनः ॥ यति



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तन्मन्मयत्वेन तन्मन्मेरूढेस्तदात्मनेति॥ आदिना उपायप्रदर्शनेन प्रपञ्चितम्। ए
तच्च॥ अतिक्रुद्धः प्रहृष्टो वा किं करोमीति वा मृशन्॥ धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः
प्रतिष्ठित इत्यादिना प्रबुद्धः स्यादनावृत इत्यन्तेन प्रदर्शितम्॥ एतच्च स्पन्दनिर्णी
ये निराकाङ्क्षं मया विनिर्णीतम्॥ त्रिषु चतुर्थमिति सूत्रे शाक्तजाग्रदादौ तुर्यानुप्राणनमु
क्तमनेन तु सर्वदशागतनादिमध्यान्तेषून्मेषस्थितिसंहारनिरूपितया भङ्ग्या निरूपितेनेति
नि विशेषः॥ एतच्च त्रिपदाद्यनुप्राणनेनान्तर्मुखत्वावष्टम्भदशायामेवासाद्यमन्तु
व्युत्थिते तु॥ चित्तस्थितिवच्छरीरकरणबाह्येषु त्रिपदाद्यनुप्राणनमित्येव च॥ यथा
न्तर्मुखरूपायां चित्तस्थितौ तुर्येणानुप्राणनं कुर्यात्॥ तथा शरीरकरणबाह्याभासा
त्मिकायां बहिर्मुखतायामप्यन्तर्विमर्शावष्टम्भबलात्क्रमात्क्रमं तारतम्यभाजा
नेनानुप्राणनं कुर्यात्॥ यदुक्तं श्रीविज्ञानभैरवे एव॥ सर्वं जगत्स्वदेहं वा स्वानन्द
भरितं स्मरेत्॥ युगपत्स्वामृतेनैवमान्तरीं तुर्यदशामात्मत्वेन तु विमृशति॥ तदा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू० वि०

३३ देहादिप्रमातृताभावादपूर्णम्मन्यतात्मकाणवमलस्वरूपात्॥ अभिलाषाद्बहिर्गतिः
संवाह्यस्य॥ शक्तिचक्राधिष्ठितैः॥ काञ्चुकान्तःकरणैर्बहिष्करणतन्मात्रभूतैः॥ स
ह संवाह्यते योनिर्योन्यन्तरं नीयते इति संवाह्यः कर्मात्मरूपः पशुस्तस्याभिलाषो
मलोऽत्र त्विति श्रीस्वच्छन्दोक्तनीत्या पूर्णम्मन्यतात्मकाविद्याख्याणवमलरूपाद
भिलाषाद्धेतोर्बहिर्गतिर्विषयोन्मुखत्वमेव भवति न त्वन्तर्मुखस्वस्वरूपावहितत्वं जा
तुचित्॥ यदुक्तं कालिकाक्रमे॥ यदविद्यावृततया विकल्पविधियोगतः॥ शिवादौ
त्रैव कटिमि समुद्भावयते स्वतः॥ ततः शुभाशुभाभावाल्लक्ष्यन्ते न तद्वशात्ततः॥
अशुभेभ्यश्च भावेभ्यः परं दुःखं प्रजायते॥ अनन्त्यां कल्पनां कृत्वा पच्यन्ते नरकादि
षु॥ स्वोत्थैर्दोषैश्च दह्यन्ते चेतसा वह्निना यथा॥ मायामयैः सदा भोगैरविद्योपरि
भुञ्जते॥ मायामयीं तनुं यान्ति ते नराः क्लेशभाजनमिति॥ यदा तु पारमेशशक्तिपा
तवशोन्मिषितं स्वस्वभावमेव विमृशति॥ तदाभिलाषाभावान्नास्य बहिर्गतिर ३३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पिबात्मारामत्वे चानित्यमित्याह ॥ नदारूढप्रमितेस्तत्क्षयाज्जीवसंक्षयः ॥ तदिति पूर्व
निर्दिष्टं तचेत्त्वात्मनि तुर्यपदे आरूढा तदिति मर्शनपरा प्रमितिः ॥ तं विद्यस्य योगिन
स्तस्य तदित्यभिलाषरूपाज्जीवस्य तेवाद्यात्मनः पुर्यष्टकप्रमातृभावस्य क्षयः प्रशम ६
स्तित्प्रमातृमयतेव स्फुरतीत्यर्थः ॥ यदुक्तं तन्त्रे च ॥ यथास्वमानुभूतार्थान्सुबुद्धो नै
व पश्यति ॥ तथा भावनया योगी संक्षिप्य पदमान्तरम् ॥ विहाय कल्पनाजालमद्वैतेन परा
मृशन् ॥ यः स्यात्मनिरतो नित्यं कालग्रासैकतत्परः ॥ कैवल्यपदभाग्योगी स निर्वा
णपदं लभेदिति ॥ कैवल्यपदभागिनीन्द्रियतन्मात्रादिभिरसंवेद्यः नन्वेवं जीवसंक्षये
सत्यपि देहपातः प्राप्तो न चासौ सुप्रबुद्धस्यापि पदेहिनः सदैव दृश्यते ॥ तत्कथमयं त
दारूढप्रमितिरित्याशङ्क्याह भूतकञ्चुकी तदाविमुक्तो भूयः पतिसमः परस्तदेत्यभिला
षारूपाज्जीवसंक्षये पुर्यष्टकप्रमातृताभिमानविगलने सत्ययं भूतकञ्चुकी शरीरं भौति
भूतानि कञ्चुकमिव व्यतिरिक्तं प्रावरणमिव नत्वहन्तापदस्पर्शीनियस्य तथाभूतः सन्नि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुक्तौ निर्वाणमाप्यते ॥ भूयो वा कुलत्वेन यानि समस्तक्षिद्दर्शनपाशैः स्वेच्छया स्वरूपाच्छादन
रूपपरपूर्णाः शरीरशक्तिनिर्गलमित्युक्तस्वार्थमीत्यादलकल्पदेहादेरस्थिरेनापि नन्तम्
मानन्तासंस्कारेणास्य बन्धः ॥ तदुक्तं श्रीकुलरत्नमालायाम् । यदा गुरुवरः सम्यक् कथयेत्तन्न
संशयः ॥ मुक्तस्तेनैव कालेन यन्त्रस्तिष्ठति केवलं ॥ किं पुनश्चैककनानसुपरे ब्रह्मसायुः
सुधीः ॥ क्षणमात्रं स्थितो योगी स मुक्तो मोचयेत्प्रजा इति ॥ श्रीमत्त्रिंशिकायामपि ॥ निमे
षोन्मेषमात्रं तु तत्त्वं यद्युपलभ्यते । तदैव किल मुक्तोऽसौ न पुनर्जन्म चाप्नुयादिति ॥ कु
लसारेऽपि ॥ अहो तत्त्वस्य माहात्म्यं ज्ञानमात्रस्य सुन्दरि । श्रोत्रान्तरं तु सम्प्राप्तेन
तत्क्षणादेव मुच्यते इति ॥ ननु भूतकञ्चुकित्वमप्यस्य कस्मात्तदेव न निवर्तते इत्याह
॥ नैसर्गिकः प्राणसंबन्धः ॥ निसर्गात्स्वातन्त्र्यात्मनः स्वभावादायातो नैसर्गिकः ॥ प्रा
णसम्बन्धः संवित्किल भगवती चित्प्रवेदिविभागव्याप्तिषु संकोचावभासपूर्वकं संकुचद
शेषविश्वस्फुरणात्मकप्राणनारूपयाहकभूमिकां श्रित्यागता द्यस्वरूपजता दाभासा



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्मना स्फुरतीति नैसर्गिकः स्यात्तस्या स्वात्मप्रथमुद्भासितोऽस्याः प्राणसम्बन्धः ॥ तथा च
सा / श्रीवाजसनेयायाम् ॥ या घूर्णा शक्तिः परा सूक्ष्मा व्याधिनी निर्मला शिवा ॥ शक्तिचक्र
स्य जननी परानन्दामृतात्मिका ॥ महाघोरेश्वरी चण्डा सृष्टिसंहारकारिका ॥ त्रिव
हं त्रिविधं त्रिस्थं बलात्कारं प्रकर्षतीति संविदग्र्यभावत्याः प्राणक्रमेणानाडित्रि
य वाहि सोमसूर्यवह्न्यात्मावस्थित्या तीतानागतवर्तमानरूपबाह्यकालोल्लासन
चित्रापनकारित्वमुक्तम् ॥ तदुक्तं श्रीस्वच्छन्दे ॥ प्राणः प्राणमयः प्राणो विसर्गा
पूरणं प्रति । नित्यमापूरयत्येष प्राणिनामुरसि स्थित इति ॥ प्राणस्य हकारस्तु म
न्तः प्राणः स्वरत्नोहलाकृतिरित्युक्तनीत्या श्रीस्वच्छन्दभट्टारकरूपप्राणमयत्वा
द्विसर्गापूरणयास्य सृष्टिसंहारकारित्वमभिहितमित्युक्तमुक्तं नैसर्गिकः प्राणसम्ब
न्ध इति ॥ [illegible] श्रीकल्लटेन प्राणाख्यनिमित्तदार्ढ्य पाकं सविन्यारोपारे
[illegible] चिताभाणावुक्तम् ॥ अतश्चास्य स्थितेऽपि नैसर्गिके प्राणसम्बन्धे यस्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०वि० दारूढ आन्तराकर्षणाविमर्शात्मा स्पन्दलोकोत्तरं—इत्याद्यं॥ नासिकान्तर्मध्यसंयमा
३५ त्किमत्र सव्यापसव्यसौषुम्नेषु॥ सर्वनाडीचक्रप्रधानतत्त्वेषु सव्यापसव्यसौषुम्नेषु
दक्षिणवाममध्यनाडीपदेषु प्राणनासिका॥ तत्तत्कौटिल्येन वहनीनिरुक्त्या कुटि
लवाहिनी प्राणशक्तिः॥ तस्या अन्तरित्यान्तरीमं विलस्या अपि मध्यं सर्वान्तरतम
तया प्रधानं॥ तस्य देवतिदेवस्य परबोधस्वरूपता॥ विमर्शः परमाशक्तिः॥ सर्वज्ञ
ज्ञानशालिनीति श्रीकालिकाक्रमोक्तनीत्या विमर्शमयं रूपं तत्संयमात्तन्निमी
लनप्रकर्षात्किमत्रोच्यते॥ अयं हि सर्वदशासु देदीप्यमानो नित्युत्थानसमा
धिः॥ तदुक्तं॥ श्रीविज्ञानभैरवे॥ ग्राह्यग्राहकसंवित्तिः॥ सामान्या सर्वदेहिना
म्॥ योगिनां तु विशेषोऽयं सम्बन्धे सावधानतेति॥ एवमीदृशस्य योगफलं दर्शी
यन्प्रकरणमुपसंहरति॥ भूयः स्यात्प्रतिमीलनम्॥ चेतन्यात्मनः स्वरूपादु
स्प दितस्यास्य विश्वं भूयः॥ पुनर्विगलितभेदसंस्कारात्मनावाहुल्येन च प्रतिमील ३५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नैचेतन्याभिमुख्येन मीलनम् ॥ पुनरपि चेत्यात्मस्वरूपोन्मीलनरूपं पर
योग्याभिनिविष्टस्य योगिनो भवति ॥ तदुक्तं श्रीस्वच्छन्दे ॥ उन्मना परतो देवि तत्रात्मा
नं नियोजयेत् ॥ तस्मिन्युक्तस्ततो ह्यात्मा तन्मयश्च प्रजायते इति ॥ तथा च उद्बोधितो
यथा वह्निर्निर्मलो भाति भास्वरः ॥ न भूयः प्रविशेत्काष्ठं तथात्माध्वन उद्धृतः ॥ कलङ्को
त्मुनिर्मुक्तो विगतक्रमः ॥ नक्तस्योपि न बाध्येत यतोऽतीव सुनिर्मल इति ॥ भूयः स्या
दित्यभिदधतोऽयमाशयः ॥ यच्छिवत्वमस्य योगिनो नापूर्वमपि तु स्वभाव एव ॥ के
वलं मायाशक्त्युत्थापितस्वाधिकल्पदोरात्म्याद्भासमानमपि तत्रायं प्रत्यवमर्षं कु
म इत्यस्योक्तोपायप्रदर्शनक्रमेणानंदेवाभिव्यज्यत इति शिवम् ॥ इति शिवसूत्र
विवृतवार्त्तोपायप्रकाशनं तृतीय उन्मेषः ॥ सेयमागमसंवादस्पन्दसङ्गति
सुन्दरा ॥ वृत्तिश्चेयं रहस्यार्थशिवसूत्रेषु दर्शिता ॥ शिवरहस्यनिदर्शनमंत्रव
न्नवनयामलमारसो ह्लवाराम् ॥ सुकृतिनोरसयन्त्वनुभवाश्लिष्टदेस्फुटमिमां शिवसूत्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू० वि० विमर्शिनी नाम॥ इयमशेषकिल्मषां रुचिवर्धिनी परिशीलितं ननु ने परमां मते॥ रसनमात्र
३६ न सु॰ नमुधो ध्रुवस्मिन्निजराजननादिभया पदृत॥ देहप्राणसुखादिभिः परिमिता
हन्तास्पदैः॥ संरतश्चेतन्यं चितु र्नैनिजं नमु महन्माहेश्वरं स्वं जनः॥ मध्ये बोधसुधा
ब्धि विश्वमभितस्तत्फेनपिण्डोपमं यः पश्येदुपदेशतस्तु कथितः साक्षात्स एकः
शिव॥ नरलरसासंसाराब्धिं विधत्त परे पदे पदमुचिचरूनं नित्यालोकप्रमोदश्रुति
भरे॥ विमर्शनशिवप्रोक्तं सूत्ररहस्यमनुज्झरूं प्रमभवि लसत्सद्गुणपान्तःसमु
न्मेषदायितत्॥ ॥इति श्रीशिवसूत्रविमर्शिनी समाप्ता॥ ॥ ॥



CC-0. Jangamwadi Math Collection. Digitized by eGangotri